15. चक्रबन्धः- एते चत्वारश्चक्रश्लोकाः चतुर्षु चक्रेषु प्रत्येकं लिखितव्याः। कथम् - वृत्ताकारामेकां रेखां लिखित्वा तामभितः तद्वच्चतस्रो रेखा लिखितव्याः। एवं पञ्चरेकात्मके चक्रे प्रागारभ्य प्रत्यगवसाने द्वे रेखे दक्षिणमारभ्योत्तरावसाने द्वे रेखे लेखितव्ये। तत्र नाभेः प्राचीनभागेन पश्चिमभागेन च द्वौ द्वौ विवरौ सम्पद्येते। तत्र रेखाद्वयमध्ये यत्पदं दृश्यते तत्रैकस्मिन् पदे प्रागारभ्य प्रथमपादस्यैकैकमक्षरं लेखितव्यम्। एवं दक्षिणपूर्वश्यां दिश्यारभ्य पश्चिमोत्तरावसानयोर्मध्यगतेषु अपि पदेषु द्वितीयः पादो लिखितव्यः। एवं दक्षिणस्यामारभ्य रेखयोर्मध्यगतविवरेषु तृतीयः पादः। एवं पश्चिमदक्षिणस्यारभ्य रेखयोश्चतुर्थः पादः। एवं प्रथमश्श्लोकः। इतरेषामपि त्रयाणां श्लोकानामेवं विधेषु त्रिषु चक्रेषु लेखनं कार्यम्। तत्र प्रथमाच्चक्रादारभ्य तत्र प्रथमपङ्क्तिषु प्रागारभ्य प्रदक्षिणे वाचयितव्यम्। तत्रैषश्श्लोको दृश्यते -

यमकानामाकरोऽयं कंसध्वंसकथा तथा।
चकार तदिदं काव्यं श्रीवत्साङ्कः पराशरः॥

16. तदिष्टं सर्वतोभद्रं भ्रमणं यदि सर्वतः॥ K.A – III – Ve. 80.

17. स चायं सर्वतोभद्रोभयार्धश्लोकः। चतुरङ्गक्रीडायामिव चतुष्षष्टिपदानि लिखित्वा प्रथमपङ्क्तौ पदाष्टकक्रमेण प्रथमान्यष्टाक्षराणि लेखितव्यानि। द्वितीयतृतीयचतुर्थासु पङ्क्तिषु क्रमेण द्वितीयतृतीयचतुर्थान्यष्टाक्षराणि ततः पञ्चमपङ्क्तौ आरभ्य चतुर्थप्रभृतीनि प्रथमान्तान्यष्टाक्षराणि लेखितव्यानि। एवं विलिखिते चतसृषु पर्यन्तपङ्क्तिषु प्रथमान्यष्टाक्षराणि प्रदक्षिणं प्रसव्यं च यथेष्टं वाचयितुं शक्यते। सर्वदिक्षु द्वितीयपङ्क्तिषु द्वितीयाष्टक्षराणि प्रदक्षिणं प्रसव्यं च वाचयितुं शक्यते। उत्तरार्धेऽप्ययमेव प्रकारः। एवं चोभयोरर्धयोस्सर्वतोभद्रत्वम्॥

18. अर्धाभ्यासः समुद्रः स्यात्। — K.A – III Ve.53

19. पादाभ्यासोऽप्यनेकात्मा व्यज्यते स निदर्शनैः। — *Ibid*

20. व्यवहितमन्तभागयमकम्। — *Ibid* Ve, 41.

21. प्रतिपादं वृन्तादुपरि पुष्पमिवावस्थितत्वात् पुष्पयमकमिति। — Bh.K Com.X–14

22. सन्दष्टयमकस्थानमन्तादौ पादयोर्द्वयोः। उक्तान्तर्गतमस्येतत् ……………… ॥ — K.A –III Ve.51

23. काञ्चीयमकमिति रसनाकारेण यमितत्वात्। तथाद्यपादस्यान्ते परस्यादौ च सदृशो विन्यासः॥ — Bh.K Com X – 8

24. एकाकारचतुष्पादं तन्महायमकाह्वयम्॥ — K.A – Ve.70

25. अयुक्पादयमकमिति प्रथमतृतीययोर्यमितत्वात्। — Bh,K ComX-10

26. सर्वेषु पादेषु यमितत्वात् आदिमध्यान्तयमकम् । K.A Com III -50

27. आवृत्तिः प्रातिलोम्येन । K.A -Ve 73

CHAPTER - V

Chapter V

Visistadvaitic concepts as focused in Y.R.

CHAPTER - V

Viśiṣtādvaitic concepts as focused in Y.R

Viśiṣtādvaita- qualified non-dualism; pan synthetic monism.

A *Bhakti* school of *Vedānta* whose consolidator and exponent is **Śrī Rāmānujācārya**. It posits three ultimate realities: *Īśvara, Cit* and *Acit,* which exist in an inseparable relationship, though *Cit* and *Acit* are dependent upon the independent *Īśvara.* The complex whole forms an organic unity and thus its name, ***Viśiṣtādvaita***[1].

Amongst major philosophies, *Viśiṣtādvaita* as propounded by **Śrī Rāmānujācārya** regards *Brahman* and *Prakrti* as identical and real entities.

1. ***Param.***

" **परम्** अमृतमनन्तादिं तुष्टावसुथा । (तुष्टाव)"

- I – V.81

The author uses the word *param* to bring out the viśiṣtādvaitic concept. He explains the word quoting " **रसो वै सः** " (Tai. U) and justifies that Lord Viṣṇu is Bliss.

He is that sentiment experienced ultimately leading to Bliss or the Essence *(Rasa).* In the context, "being pleased by the divine beings the goddess of earth has praised Viṣṇu- the Supreme Bliss one.

2. Krīḍā.

("वेदाः क्रीडा जगतो जनिजीवनमरणमुक्तिसंसाराः")

In another instance to explain the word *Krida* - II . V.13) the author quotes

"लोकवत्तु लीलाकैवल्यम्" । B.S. 2.1.33

This *sūtra* is explained as follows in the *Śrī Bhāṣya* commentary, "In the world kings who rule over the earth consisting of seven islands, and who possess power in full, are seen to play with balls for mere amusement. So does *Brahman* for no purpose other than amusement only creates, sustains and destroys the world with His mere will. He is said to be full of objects of desire. This means that when He wishes a thing, it is attained. Thus the suggestion here through the word *krīḍā* (sport) of Lord (Viṣṇu) is to denote the evolution, sustenance and dissolution of the world.

3. Sat:

" यं श्रुतिराह ब्रह्म सत् आनन्दमय-ज्ञ-सत्यचित्तत्वम् "

(II – V.14)

The author uses the word "*Sat*" (truth) in the above verse. The Vedic texts points out Viṣṇu is the Real Truth; The author quotes

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्।

This statement of *Ch.U* - The universe was Sat; before the time of creation it was without name and form; *Brahman* is one after creation and there is nothing as 'second'. Further to establish the Viśiṣṭādvaitic concept he quotes,

"एको ह वै नारायण आसीन्न ब्रह्मा नेशानः"।

According to Nārāyaṇa i.e Viṣṇu was existed alone as Supreme Reality and there was no four - faced *Brahma* nor *Śiva*. The author adds

"आत्मा वा इदमेक एवाग्र आसीत्"।

This phrase from Ai.U means that "In the beginning verily, all this was *Ātman* alone." And asserts that is none other than Viṣṇu.

4. Brahman

The author writes the usage of the word *Brahman* (Chap. II V.14) and suggests that the Supreme being is regarded as impersonal and divested of all quality and action; According to *Vedāntins*, *Brahman* is both the efficient and the material cause of the visible universe, the all pervading soul and spirit of the universe, the essence from which all created things are produced and into which they are absorbed. Here, the author advances arguments to justify that the Supreme being is Nārāyaṇa.

"नारायण परं ब्रह्म"। "तत्वं नारायणः परः"। (P.S)

Thus, Viṣṇu alias Nārāyaṇa is identified as the Supreme being. *Ānandavalli*-1 of *Tai.U* says Viṣṇu as

"सत्यं ज्ञानमनन्तं ब्रह्म"

i.e, the supreme Reality, Supreme knowledge, the endless and Supreme being.

5. ***Ānandamaya:***

The word Ānandamaya means attributed to Viṣṇu in the context that the Supreme sprit is of unlimited bliss. The commentary quoting *Brahma Sūtra*

"न बुद्धिमात्रम्" ।

from *Śrībhāṣya* explains that 'He', the supreme being can't be known by intellect. He further quotes

"तस्माद्वा एतस्माद्विज्ञानमयात् अन्योन्तर आत्मानन्दमयः" ।

(Tai. U – A . v)

And explains about the *Ānandamaya,* that "there is a being known as *Ānandamaya* who is other than this *Vijñānamaya* and who is with in it; He is the Supreme soul. Again the commentary quotes,

"स यश्चायं पुरुषे यश्चासावादित्ये स एकः" ।

(Tai.U-Bhr.V)

and Suggests the eternal bliss as this Supreme soul appears as Viṣṇu and He alone shines in the sun.

Further to explain the phrase *Ānandamaya* he quotes

"यस्सर्वज्ञस्सर्ववित्" (Mu. U- 2.2.7)

and argues that He is alone Omniscient and all knowing.

*5. **Puṇḍarīkadṛk:***

The word ***Puṇḍarīkadṛk*** (II – V.15) is being explained. "Lord Viṣṇu is lotus–eyed". He is identified as -

" य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते "।

(Cha . U – 1.6.6)

The *Purusa* (Primeval- being) shines like gold, who is seen within the sun with golden beard, hair and golden all through the body.

Again he quotes,

" तस्य यथा कप्यासं पुण्डरीकमेवाक्षिणी "।

(Ibid 1.6.7)

"His eyes are like the lotus flower newly opened to sun's rays."

*6. **Daharākāśa**:*

Again to explain the word *Daharākāśa* the following quotations is taken for support.

" अपहतपाप्माविजरो विमृत्युर्विशोकः "

(Cha.U - 1-6-7)

Accordingly, Viṣṇu is *Ātma,* He is free from *Karma*, Old-age, death, grief (hunger and thrist). He has unchanging objects of desire; His will is never frustrated. He quotes further,

"अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तन्वेष्टव्यं तद्वा विजिज्ञासितव्यम् " (Ibid - 8.1.1)

There is in the city of *Brahman* a dwelling place in the form of a small lotus; The small ether within it and what is within it both should be sought and be meditated upon. *Śrī Bhāṣya's* statement-

" दहराकाशशब्देन परं ब्रह्मोच्यते "

(S.Bh.Da. Adhi.8.1.1)

strengthens this idea. The small ether is the highest *Ātma.* This is stated in the sutra. Moreover, the text,

" स यश्चायं पुरुषे यश्चासावादित्ये स एकः "

(Tai. U- Bhr . v)

quoted, explains that the reality in the core of man and the reality which is in the sun are one and the same.

दहर - literally- small; subtle; the small space in the heart which is identified with *Brahman.*

दहराकाश - Subtle space in the heart.

दहरविद्या - Meditation on ब्रह्मन् as the subtle ether in the heart.

7. ***Te ye śatam*** : -

The words

“ते ये शतं” (Ch. II – V.19)

indicates the concepts of Viśiṣṭādvita while explaining the attributes of Lord Viṣṇu. The author quotes,

“ ते ये शतं मानुषा आनन्दाः। स एको मनुष्यगन्धर्वाना-मानन्दः” ॥

(Tai. U – A . v)

This is one human bliss. This bliss is above 100 times of happiness of human–being, *Gandharvas* and all others.

“ स एको ब्रह्मण आनन्दः ” ॥ (Tai.U – A.V)

His is the greater bliss than of *Brahman*.

8. ***Guṇanikāyeṣu*** : -

The word गुणनिकायेषु in “ दृष्टा केयत्ता गुणनिकायेषु ” (II – ve 19) explains the unlimited attributes of Lord Viṣṇu. To justify this the author quotes,

“ यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति ” ॥ (Tai.U–A.v)

"He who knows the bliss of *Brahman,* from which all words return without reaching it, together with the mind, is no more afraid of anything" ,(because the supreme has indescribable, inexplicable and unlimited *attributes.)*

9. ***Param tattvam*** : -

To denote Viṣṇu as the supreme Reality he used the word परं तत्त्वं

(Ch. II – V. 21)

for which, the commentary quotes, from *ŚrīBhāsya*

"गति सामान्यात् "। (B . S – 1. 1. 11)

"The ideas are to explained as in the earlier quotations".

" आत्मा वा इदमेक एवाग्र आसीत् " । (Ai . U – 1)

In the beginning verily, everything was *Ātman* alone.

" यतो वा इमानि भूतानि जायन्ते " । (Tai . U – Bhr . v)

Quoted by him affirms that from this Viṣṇu- the supreme principle the entire universe is created.

Again the following oft quoted statement

"सदेव सोम्येदमग्र आसीत् "।

(Ch . U – 6. 2. 1) and

"एकोह वै नारायण आसीत् "।

(M .U)

confirms that Nārāyaṇa alone is the Supreme being.

NOTES - FIFTH CHAPTER

1. Vide - A concise dictionary of Indian Philosophy of John Grimes

2. *Daharavidyā*

The eight chapter of Ch.U contains what is traditionally called *daharavidyā*. Its importance is fairly well established. There are versions of it in the Tai.U – IV and in the Bṛ.U discourse of **Yājñavalkya** to **Janaka.** As its main purport seems to be delineation of the supreme self as residing in the heart of man, the parallelism extends even further. The conception of *Brahman* as transcendent but still dwelling in the center of the individual may even be claimed to be fundamental doctrine of the *Upaniṣads.* One will not be far long, if one recognizes the *Daharavidyā* as a focal text in the entire bulk of *Upaniṣadic* literature - Śrī Rāmānuja on the Upaniṣad by S.S. Raghavachar.

CHAPTER - VI

Chapter VI

Conclusion

CHAPTER – VI

Conclusion

Sanskrit literature has been enriched not only by the poets who embellish the *kāvyas* through *Arthālaṅkāras,* but also by a few authors who skillfully employed *Śabdālaṅkāras.* Śrī Kūrattāzhvān composed Y.R in *Āryā* metre applying *Yamakālaṅkāra.* Needless to say that followed the style *Nārikelapāka.* In order to facilitate easy understanding of the text, he has also added the commentary.

The nature of this *citrakāvya* is unique and as the author claims, his work excels Gh.K.K. in this Artistic presentation. His choise of composition with *Yamaka* is deliberate and recognition for this is his aspiration. It has been pointed out, *Ādikavi* has sown the seed for *Yamakālaṅkāra* in the fifth canto of *Sundarakāṇḍa* of *Rāmāyaṇa.* Aśvaghoṣa's *Buddhacarita* and *Soundarānanda*, Kālidāsa's *Raghuvamśa* and *Kumārasambhava*, Bhāravi's *Kirātārjunīya*, Bhaṭṭi's *Rāvaṇavadha*, Kumāradāsa's *Jānakīharaṇa*,Śrī Harṣa's *Naiṣadīyacarita*, have *Yamakas*, but used rarely. Appayyadīkṣta, has mentioned about *Yamaka* in his *Alaṅkāra* work

Ku.Ā, has recognized *Yamaka* in his commentary on Y.A of Vedānta Deśika.

From the study of Y.R, it is known that employment of *Yamaka* is not an easy task. The study of this work increased the vocabulary of the readers. It adds attraction to the sentences and makes the reader enjoy the rhythm in chimes. It presents a musical language. That is why, even the great poets like Kālidāsa have given a share for *Yamaka* in their works. The device of forming bandhas with *Yamaka* not only shows the skill of the poet, but also serves as the model for poets who want to embellish their poetry. Like '*Gamaka*' to the music, *Yamaka* is to poetry which is an aspect of attraction.

"विद्यावतां कुरु भागवते परीक्षा" is the general adage. In tune with this saying, many poets like Vedānta Deśika (*Yādavābhyudaya*) have resorted the story of Kṛṣṇa from the *Daśama Skanda* of *Bhāgavatapurāṇa. Āzhvān* is of no exception. He chose to narrate the talents of Kṛṣṇa, and to bring out his talent in composing a whole *kāvya* with *Yamaka.*

The life and background of the author *Āzhvān* reveals that he was an erudite scholar in explaining the *Tiruvāimozhi.* His expertise in it made even

Rāmānuja to astonish. Born rich, he led a simple and saintly life, helping the poor. He was the harbinger of Viśiṣṭādivaitic school. A true servant of the Lord and his *guru*; He himself became the mentor for many disciples. He gained boons from Lord Varadarāja to himself and also to one who caused damage to his eyes. Thus he had all the Vaiṣṇava traits.

The narration of the birth of Kṛṣṇa till the killing of Kamsa in an abridged form is worthy, though rendered in a hair splitting *Yamaka* style. His mythological allusions to Kūrmāvatāra, Varāhāvatāra, Prahlāda in Narasimhāvatāra, Vāmana and Trivikramāvatāra, Gajendramokṣa, Amṛurtamathana, divine cow Surabhī, killing of Madhu, lying on banyan leaf are apt.

The chapter on the essence of Y.R indicates the nature of work. The descriptions and the figurative expressions etc, which could be wholly and separatedly brought out due to the terse construction of Yamaka-words. Only a few samples are exemplified in the respective chapters. While reading this chapter the scollars will recollect certain expressions of poets like Kālidāsa, Bhāravi, Māgha Śrīharṣa and others.

He shines as a competent commentator while commenting on the naming ceremony performed by Garga to Kṛṣṇa, he provides the list of all the forty samskāras. Thus *Azhvan* is capable of making the readers recollect the entire Bhāgavatam. So also he enlists the 24 tattvas like Mahat, Ahaṅkāra etc, without allowing any ambiquity on the part of the reader. Despite many constraints, the author has not failed to uphold the sentiments, at the appropriate places.

The adage " निरङ्कुशाः कवयः" is more apt to *Āzhvān* for he compromises the spellings of certain words in order to effect Yamaka. ForEg He uses मधुरा instead of मथुरा , मन्थर instead of मन्दर in some places. Such devices are with in scope of poetic licence and practice, as in the case of the usage of words नारिकेल . नालिकेर नालिकेल नारिकेर and मरकत मरतक etc.

The author in order to bring out the Viśiṣṭādvaitic concepts quotes a few pharses from the *Upaniṣads*, Brahmasūtra and Śrībhāṣya. Particularly when he describes the word *Ātmā* he means *Paramātmā*- the basic principle, enveloping the living and non living beings.

Āzhvān's vocabulary is vast and he is well versed in grammar. "यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् "– As per this Patañjali's advise, a peep into Y.R. would enrich the knowledge in Sanskrit language. His Sanskrit syntax is generally hard. He used some pharses and words in rare sense. The grammatical usage of Azhvan has been appraised by the great poet of 17th A.D. Appayadiksita in his commentary on Y.A. of Vedanta Desika .* (ref. Yadavabhyudaya –I canto- v.100) The author of this work Sri Kūrattazhvan alias Srivatsacihna misra has given the good opportunity to the readers interested particularly in grammar through the explicable commentary of his work. As per the dictum, "एकः शब्दः संयग्ज्ञातः सुष्टु प्रयुक्तः स्वर्गे लोके कामधुघ् भवति " (A single word, well known, and practiced in good manner itself becomes as a desire yielding cow even in the Heaven.*) Azhvan's commentary would help the reader increase the vocabulary of Sanskrit and also in consonance with Bhamaha's views,

"काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत्।

उत्सवः सुधियामेव हन्त दुर्मेधसो हताः ॥

If even such works as these which like scientific treatises are intelligible only with the aid of Commentories that are to be accepted as Kavyas, (then) the wise ones only are fortunate, woe to the unenlightened!).* The study of Y.R. would really bear fruit. Besides this work is a challenge to the gnomic poem Gh. K. K of 23 verses in which the poet Ghatakarpara poses a challenge that "I swear in the name of the love of (my) solely devoted wife (on by the loves of sprightly damsels) and thissty, tiuching water to be slipped from the hollow palms of my hands, if Ibe vanquished by any other poet in the application of Yamakas, Ishall carry for him water in a broken pitcher.*

Azhvan has certainly excelled Ghatakarpara, by composing 1011 verses and had put Ghatakarpara to shame by breaking a record. Thus, Azhvan occupies an important place among the Yamaka poets.

The present edition of the Y.R. is based on a single Ms. Printed in telugu and published by Sri Vaishnavs Granta Mudrapaka Sabha, Chennapatnam in 1906 A.D. on Parankura Era (vide N.C.C.)

नाट्येऽलङ्कृतयः स्फुरन्ति सततं श्रुत्या समं तत्त्वतः
व्यज्यन्तेऽनुपदं स्वकीयहृदयोद्गारास्ततो दर्शकैः ।
आनन्दाम्बुनिधौ निमग्नमनसो नन्दन्ति चान्ये जनाः
शब्दालङ्कृतिरेव तत्र जयति प्रत्यग्रमोदप्रदा ॥

(Source unknown)

APPENDIX-I
TEXT OF Y.R.

Number of verses in the Y.R.

(Chapter wise)

Chapter	Verses
I	81
II	52
III	62
IV	59
V	52
VI	53
VII	51
VIII	57
IX	69
X	66
XI	71
XII	68
XIII	57
XIV	71
XV	66
XVI	76
Total	**1011**

श्रीमते रामानुजाय नम ः

श्रीमत्कूरत्ताल्वान् इति विख्यात श्रीवत्सचिह्नमिश्रकृत यमकरत्नाकरः

श्रीमत्कूरत्ताल्वान् तनियन् - ध्यानश्लोक ः

श्रीवत्सचिह्न मिश्रेभ्यो नम उक्तिमधीमहि ।
यदुक्तयस्त्रयी कण्ठे यान्ति मङ्गलसूत्रताम् ।।

अथ प्रथमाश्वास ः

पद्मा क्षमा समेतं प्रसन्नतोयदगतिस्वभावस्थम् ।
पद्माक्षमासमेतं प्रसन्नतो यदगति स्वभावस्थम् ।। 1 ।। समुद्गयमकम्

मायाहीनो ज्यायानेतावानित्यमेयोऽय ः ।
माया हीनो ज्याया नेता वा नित्यमेयो य ः ।। 2 ।। स. यमकम्

योऽगीयत धीरोऽजो वेदान्तेऽनामयन्नियत्य पदम् ।
योगी यतधीरोजो वेदान्ते नाम यन्नियत्यपदम् ।। 3 ।। स. यमकम्

अभिगुं भामास्वाद्यामभिया मनवामहै माङ्गाम् ।
अभिगुंभामास्वाद्यामभियाम नवाम हैमाङ्गाम् ।। 4 ।। स. यमकम्

भीमोक्षदान्तिकारणमामनता मानयध्वमनुनीत्या ।
भी मोक्षदान्तिकारणमामनतमा नयध्वमनु नीत्या ।। 5 ।। स. यमकम्

यो ज्येष्ठो विधिरमरव्रजस्तु तमाद्यतानिंतामरसमितम् ।
जनयन्तमधुमधनंव्रजत स्तुत माद्यतानितामरसमितम् ।। 6 ।। द्विचतुर्थपादयमकम्

सुरतरवे हतहयरथनरकरिपुञ्जम्भजेतारम् ।
जितवन्तमाजिभूमौ नरकरिपुञ्जम्भजेतारम् ।। 7 ।। द्वि. च. पा. य

यातुजनान्धर्मभिदोऽपदमानमताञ्जनेयस्य ।
धीरूदमलयदस्य च पदमानमताञ्जनेयस्य ।। 8 ।। द्वि. च. पा. य

बुद्धे भविष्यसि श्रितपराङ्कुशा ग्रस्यमानमाया हि ।
यायास्तत्पदभक्तिं पराङ्कुशाग्रस्य मानमायाहि ।। 9 ।। द्वि. च. पा. य

भूयान्नमस्कृतिरसावरणीया यामुनार्येण ।
समनुस्रियास्म च गतिं वरणीया यामुनार्येण ।। 10 ।। द्वि. च. पा. य

कुर्मो नमः सशिरसा वाचा रामानुजायेह ।
यस्सुचरितैरतियावाचारा मानुजा ये ह ।। 11 ।। द्वि. च. पा. य

सर्वस्मिन् कविलोकेऽधीव प्राचेतसाद्यास्तु ।
सेव्या तद्गीरीश्वरधीवप्रा चेतसाद्यास्तु ।। 12 ।। द्वि. च. पा. य

लभतां रामायणमिह महनिष्यन्दम्भजन्मानम् ।
यद्ज्ञाने कवयो जवमहनिष्यन् दम्भजन्मानम् ।। 13 ।। द्वि. च. पा. य

कः किल लोकेऽत्र शुभावहो महाभारतादरादन्यः ।
यत्परिचितयो भूमावहो महाभारता दरादन्यः ।। 14 ।। द्वि. च. पा. य

नद्यांभवतापार्ताः पराङ्कुशलसद्गिरिप्रभूतायाम् ।
अलभामहि विश्रान्तिं परां कुशलसद्गिरि प्रभूतायाम् ।। 15 ।। द्वि. च. पा. य

या श्रुतिरिह तमसां सप्रणवा महतान्तराय तया ।
संवेद्यमाद्यपुरूषं प्रणवाम हतान्तरायतया ।। 16 ।। द्वि. च. पा. य

अखिलस्य योऽस्य जगतो योनिर्माता च देवकी यस्य ।
शर्मण इहावतारैर्यो निर्माता च देवकीयस्य ।। 17 ।। द्वि. च. पा. य

करिणा कृतमाह्वानं ममाथ नामग्राहं नागेशम् ।
करवाणीति य उज्झन् ममाथ नाम ग्राहं नागेशम् ।। 18 ।। द्वि. च.पा. य

यत्परयार्चा नित्यं साम्ना यजुषा महीयमानानाम् ।
सुलभैव गतिः परमा साम्नायजुषामहीयमानानाम् ।। 19 ।। द्वि. च. पा.य

यस्य त्रिविक्रमकृतभूमानं चरणमध्येयम् ।
आहुर्हृताश्वतृष्णाभूमानं च रणमध्ये यम् ।। 20 ।। द्वि. च. पा. य

यत्कृतिरपवार्य शिलासरमणीयस्यमन्दरोमन्धाः ।
गाः चक्रे श्रीर्मथने सा रमणी यस्य मन्दरो मन्धाः ।। 21 ।। द्वि. च. पा. य

बाल्येन योऽकृतायुधनिष्पात्ति रथाश्ववारणया ।
शक्त्याहन् कंसादीन्निष्पत्तिरथाश्ववारणया ।। 22 ।। द्वि. च. पा. य

यो रक्षसां वितन्वन् विश्वामित्रस्य हारको दण्डम् ।
अभनक्क्रतवे यातो विश्वामित्रस्य हारकोदण्डम् ।। 23 ।। द्वि. च. पा. य

यः पितुराज्ञां प्रीतः कृतवानरराजदमितपुण्यजनम् ।
अखिलं भुवनं मित्रीकृतवानरराजदमितपुण्यजनम् ।। 24 ।। द्वि. च. पा. य

यद्रिपुका लङ्काऽलं कलयति यश्चाखिलप्रकालं कालम् ।
धृतकङ्कालं कालं द्विषन्तमर्धयति योऽम्बिकालङ्कालम् ।। 25 ।। समुच्चययमकम्

जीवितमसुरा न स्वं न खलूनमहासुरस्वका यस्य ।
नृहरेर्दर्शनमात्रान् नखलूनमहासुरस्वकायस्य ।। 26 ।। द्वि. च. पा. य

हृदि पश्यति योगी यं तमसङ्गरूढस्तमोहायः
यं श्रुतिमयो वहत्यतितमसङ्गरूढस्तमोहा यः ।। 27 ।। द्वि. च .पा . य

भक्तानामायस्य प्रियङ्करो यो पदं च नामायस्य ।
दैत्यानामायस्य ध्वंसीष्वासोऽपि शार्ङ्गनामा यस्य ।। 28 ।। समुच्चययमकम्

यो गिरमवददब्द्धो यशोदयाऽसौ हृदा दीनाम् ।
उदधिरूदारगुणानां यशो दया सौहृदादीनाम् ।। 29 ।। द्वि. च. पा. य

अशयिष्ट वटस्य हि योऽसौ पर्णे येन वा शयानेन ।
श्रीरङ्गे क्रियते दृक् सौपर्णेये नवाशयानेन ।। 30 ।। द्वि. च. पा. य

तस्य हरेस्ताः कीर्तीस्तन्वीमह्यामनाम या यास्तु ।
तद्भक्तेभ्य इयं गीस्तन्वी मह्यामनामयायास्तु ।। 31 ।। द्वि. च. पा. य

ब्रूम उदन्तं संश्रितयमकं सारातिरेकशस्तं तम् ।
यत्राहन् सन् हरिरतियम कंसारातिरेकशस्तं तम् ।। 32 ।। द्वि. च. पा. य

ननु नानुभवेद्यमकजदुःखेदहता मती रसं सङ्गात् ।
तत्कोऽर्थो नः पुरूषान् दुःखे दहतामतीरसंसङ्गात् ।। 33 ।। द्वि. च. पा य

धीमत्सु रतिं यमकात् काञ्चन मन्ये समुत्सु कारणतः ।
यत्नेऽपि ननु लभन्ते काञ्चनमन्ये समुत्सुका रणतः ।। 34 ।। द्वि. च. पा. य

गीर्ष्विह दीपार्केन्दुजनानारीतिप्रभासमानासु ।
चित्राः प्रजासु रूचयो ना नारीति प्रभासमानासु ।। 35 ।। द्वि. च. पा. य

तत् कस्यचिद्यमकगा प्रतिभानुभवे दिवानिशं कमिता ।
स्यादेव यथा पद्मः प्रतिभानु भवेदिवानिशं कमिता ।। 36 ।। द्वि. च. पा. य

यः पूतः श्रीरङ्गसदामोदरतः कवेरजायततीर्थात् ।
कूराभिजनाद्यो वा दामोदरतः कवेरजायत तीर्थात् ।। 37 ।। द्वि. च. पा.

रामापरनामा सा वाचार्यो यस्य तात इत्योजः ।
येन स कृष्णो निर्भयवाचार्ययस्यतात इत्योऽजः ।। 38 ।। द्वि. च. पा. य

स श्रीवत्साङ्कः संयस्य श्रीरङ्गनाथशेषस्वः ।
इदमकृताश्रित्य हरिं यस्य श्रीरङ्गनाथ शेष स्वः ।। 39 ।। द्वि. च. पा. य

वाक्षु क्षुद्रासु हि नः कावाचामुद्धता दृश्या ।
जायेत न वा विदुषां कावाचा मुद्ध तादृश्या ।। 40 ।। द्वि. च. पा. य

काव्येनातो हास्यो मन्महिमनेन विश्वस्य ।
नेति हरिकीर्तिजेनामन्महि मानेन विश्वस्य ।। 41 ।। द्वि. च. पा. य

पितरं रामाह्वं गुरूमाङ्गीरसमञ्जसानूनम् ।
उपसन्नं नोपेयान्मां गीरसमञ्जसा नूनम् ।। 42 ।। द्वि. च. पा. य

हे कविनिकाय जहि हृदि मत्सरसंबन्धमवधे हि ।
दूष्येस्त्वमेव तच्छृणु मत्सरसं बन्धमवधेहि ।। 43 ।। द्वि. च पा. य

त्वयि सति ननु गौरनुभवशक्तेऽस्तु परा शरव्यासौ ।
मम देशिकौ ह्यपत्ये शक्तेस्तु पराशरव्यासौ ।। 44 ।। द्वि. च. पा. य

कथमिममियादियं गीर्माया सा देवमेतावत् ।
प्रीणीयात्कृपया मामायासादेव मे तावत् ।। 45 ।। द्वि. च. पा य

पूर्वं किल भूमिरियं सदा नवानीति साध्वसंबधम् ।
तिष्ठन्त्यथाभिपेदे सदानवानीतिसाध्वसं बाधम् ।। 46 ।। द्वि. च. पा. य

सावददेत्य सुरभसभ्(म)नलमरूद्धरयमवृषाद्यम् ।
भर्तुमहं बलमसुरमनलमरूद्धरयमवृषाद्यम् ।। 47 ।। द्वि. च. पा. य

नयति कृपानृन् हिंसादानंहो मोहि विप्राणाम् ।
लुप्यत एव च संप्रति दानं होमो हि विप्राणाम् ।। 48 ।। द्वि. च. पा. य

यान्त्यद्याध्येतारोऽपरावा रीणसज्जनानाम् ।
यायां कथमसुराम्बुधिपारावारीणसज्जनानाम् ।। 49 ।। द्वि. च. पा. य

इति गिरमवदत्संसदि सौधर्माणां क्षमा दीनाम् ।
प्राप्य किल भूमिर्यासौ धर्माणां क्षमादीनाम् ।। **50** ।। द्वि. च. पा. य

ते मन्त्रयन्त हित्वा जनार्दनं सर्वदेवराजं तम् ।
विद्म न गतिं कृतासुरजनार्दनं सर्वदेव राजन्तम् ।। **51** ।। द्वि. च. पा . य

अनुदिनसमुदितसज्जनगुरुरेषा पूर्वदेवमायासीत् ।
तेषां वसतित्वं तु धिगुरुरेषा पूर्वदेव मा यासीत् ।। **52** ।। द्वि. च. पा. य

येयं वसुधा दैत्यर्विजिता रोचेत सोपेत्य ।
पुरुषं पुराणमथ ते विजितारोऽचेतसोऽपेत्य ।। **53** ।। द्वि. च. पा य

तमिमो भुवमृद्धां कृतभारत्यागां च कारका यान्त ः ।
यः प्रलये किल भर्तुभारत्या गां चकार कायान्त ः ।। **54** ।। द्वि. च. पा य

कंसस्य मनो दानवभुजङ्गमानां विधातुरेज्येत ।
सस्थास्नूनां चिरमनुभु जङ्गमानां विधा तु रेज्येत ।। **55** ।। द्वि. च. पा. य

असुरै ः क्षपितक्षत्रब्रह्माणं ते जितामुर्वीम् ।
कृत्वा पुरश्च कर्तु ब्रह्माणं तेजितामुर्वीम् ।। **56** ।। द्वि. च. पा. य

अथ सुरपरिषत्सा मुदमुदिता क्षीरोदसीमानम् ।
गत्वैक्षत तं सिन्धुं मुदिताक्षी रोदसीमानम् ।। **57** ।। द्वि. च. पा. य

ग्रसितुं व्योमेव गतैर्भङ्गैरनुवेलमुन्नतीरयुतै ः ।
नृत्यन्तमिव भुजैरितभङ्गैरनुवेलमुन्नतीरयुतै ः ।। **58** ।। द्वि. च. पा. य

श्रियमश्रियं च कर्मण उदर्कमालालयन्तमस्यन्तम् ।
वीचिषु सङ्क्रान्ते सत्युदर्कमालालयं तमसस्यन्तम् ।। **59** ।। द्वि. च. पा. य

विक्षिपति विद्रुमं यैरनुकूलमनन्तमुल्लोलै ः ।
उल्लोपयमानं तैरनुकूलमनन्तमुल्लोलै ः ।। 60 ।। द्वि. च . पा. य

ककुभां पर्यन्तं सक्षममुत्तममूर्मिमानेन ।
कर्तुमिवोत्कं तत्र क्षममुत्तममूर्मिमानेन ।। 61 ।। द्वि. च. पा. य

मरकतमणिभिस्तीरं बहुलहरिततैस्सपर्यन्तम् ।
अपि पद्मरागरत्नैर्बहुलहरिततैस्सपर्यन्तम् ।। 62 ।। द्वि. च. पा. य

असुरबलं हि पुरातनपुञ्जितमाराद्य शस्तता कारम् ।
इति हसदिव दैत्यारेः पुञ्जितमाराद्यशस्तताकारम् ।। 63 ।। द्वि. च. पा. य

हरिदृष्ट्येव य उच्चैरून्मादी धरदरीनियद्रवतः ।
जल्पन्नितीव हरिररिरून्मा दीधरदरीनियद्रवतः ।। 64 ।। द्वि. च. पा. य

प्रथयन्ति यदूर्म्योऽग्र्यानर्जुनवाहानमा यात ः ।
रमयन् ह्रन्न हरेर्यो नर्जु न वा हानमायातः ।। 65 ।। द्वि. च. पा. य

विमलोऽतिगभीरोऽपि नवकुलधरभावहारमकरोद्यः ।
हरिभक्तोऽपि महानपि न वकुलधरभावहारमकरोद्यः ।। 66 ।। द्वि. च. पा. य

येनोच्छ्रायता तिमिरं मुक्ताशं खे विभागेन ।
यत्रास्फुटे स्फेने मुक्ता शङ्खे विभागेन ।। 67 ।। द्वि. च. पा. य

वीन्दौ निशि किल यस्मिनक्तं दिवसे विनार्यमणि जाते ।
नश्येद्ध्वान्तं धाम्ना नक्तं दिवसे विनार्यमणिजाते ।। 68 ।। द्वि. च. पा. य

यस्त्वेन तिष्ठमानोऽशङ्कि मुकुन्दाय मानेन ।
येनाघह्रता न कृतं शं किमु कुन्दायमानेन ।। 69 ।। द्वि. च. पा. य

यत्रोच्छ्रायान्निजतनुमुत्कलिका लम्भयन्ति रोधायाम् ।
वर्तेत यं हि भजतामुत्कलिकालं भयं तिरोधाम् ।। 70 ।। द्वि. च. पा. य

यत उदिता अप्सरसोऽमासुरभीकास्समन्दाराः ।
देवान् रम्या रमयामासुरभीकास्समं दाराः ।। 71 ।। द्वि. च. पा. य

यस्योर्मयो जनिभुवो वारूण्या देववाहसमितायाः ।
भान्ति क्व चिदुदितमणा वारूण्यादेव वाहसमिता याः ।। 72 ।। द्वि. च. पा. य

लेभे यतः परमया रमयामा समुदिता सुधा मानम् ।
श्रीश्च हरिमनुपरमया रमयामास मुदिता सुधामानम् ।। 73 ।। द्वि. च. पा य

समरतकः किल योऽन्तर्वनमालीनं दयामास ।
नित्यनिवासेन च यं वनमाली नन्दयामास ।। 74 ।। द्वि. च. पा. य

क्वापि च यत्र श्रितबहुतरङ्गते पद्मरागदृश्यमहः ।
न च यत्र मधुरिपौ स्वान्तरं गते पद्मरागदृश्यमहः ।। 75 ।। द्वि. च. पा. य

तत्र स्वपुण्यपरिणतिसमेऽधमानां नभोगभव्यान्ते ।
ददृशुरपूर्वामृद्धिं समेधमानां नभोगभव्यां ते ।। 76 ।। द्वि. च. पा. य

अथ पश्यन्तस्तस्मिन्नाशास्तिमितेक्षणं समुद्रेकम् ।
अलभन्त हृदि स्वस्मिन्नाशास्तिमिते क्षणं समुद्रे कम् ।। 77 ।। द्वि. च पा. य

तस्थुस्तेऽस्य पयोधेरुत्तरतारे जितात्मनामेये ।
अद्धा संसारगतीरुत्तरता रेजितात्मना मेये ।। 78 ।। द्वि. च. पा. य

समविद्रत च हरिनुतिं समामनन्तो रमामहे शस्ताम् ।
मन्वीत न काकगिरा समामनन्तो रमामहेशस्ताम् ।। 79 ।। द्वि. च. पा. य

तत्र क्षणान्निजधियो नवगत्यास्तोषतस्तु तीरगताः ।
तस्य यथाशक्ति गुणानवगत्यास्तोषत स्तुतीरगताः ।। 80 ।। द्वि. च. पा. य

परममृतमनन्तादिं तुष्टा वसुधा शनै रमाकान्तम् ।
परममृतमनन्तादिं तुष्टाव सुधाशनैरमाकान्तम् ।। 81 ।। समुद्गयमकम्

इति श्रीमत्कूरत्ताल्वान् कृत यमकरत्नाकरे प्रथमाश्वासः ।।

श्रीमत्कूरत्ताल्वान्कृत यमकरत्नाकरः

अथ द्वितीयोऽश्वासः

सुरपरिषत्सह वितताविष्वक् सेनेन नाथ मानमिता ।
विज्ञापयतावसरे विष्वक्सेनेन नाथमानमिता ।। 1 ।। द्वि. च. पा. य

तस्याज्ञया द्रुतगता स्वञ्जलयो नीयमानवदनन्ते ।
आसीनमैक्षत धनं स्वं जनयोनीयमानवदनं ते ।। 2 ।। द्वि. च पा. य

दृग्भ्यामभिपतिताभ्यां स्वागतिकमलं सतानाभ्यम् ।
धात्रा स्तुतमाश्रित्य स्वागतिकमलं सता नाभ्याम् ।। 3 ।। द्वि. च. पा. य

प्राणयितुमिवासुरहतरक्षणेरुभयोरुतापगां पृथ्वीम् ।
दधतं कारुण्यरसैरक्षणोरुभयोरुतापगां पृथ्वीम् ।। 4 ।। द्वि . च . पा. य

जगदखिलं सक्ष्माधरवनमालापादितामोदम् ।
कुर्वाणमपि दिगन्तं वनमालापादितामोदम् ।। 5 ।। द्वि . च . पा . य

नीरदनिभं विहङ्गमराजान्नुगभीरभुजगचकासीनम् ।
प्रचकासतमाकल्पैराजानुगभीरभुजगचकासीनम् ।। 6 ।। द्वि. च. पा. य

विततेऽंशौ श्रितचक्षुश्श्रुतिगमणौ बृहतिकामतो वसनम् ।
प्रवितत्येवासीनं श्रुतिगमणौ बृहति कामतोवसनम् ।। 7 ।। द्वि. च. पा. य

दधतमभितसामिद्धानधि पञ्चसदायुधानमितम् ।
अरिचक्रं कुर्वाणानधिपञ्च सदा युधा नमितम् ।। **8** ।। द्वि. च. पा. य

भृतभूषणमपि कान्तिं विनाभरणमायतामुदारमितम् ।
गरूडेनग्रगतेन च विना भरणमायता मुदारमितम् ।। **9** ।। द्वि. च. पा. य

क्रीडासु सक्तमतिरसदासु रमाया भुवश्च मत्करणात् ।
अनपेतमवन्तं जगदासुरमायाभुवः चमत्करणात् ।। **10** ।। द्वि. च. पा. य

अनुसृत्य भक्तभाषितमत्रस्तंभे जुषामहे यन्तम् ।
अवतीर्णं कर्तुं कुलमत्रस्तं भेजुषामहेयं तम् ।। **11** ।। द्वि. च. पा. य

यं गमयितृन् भवाब्धिप्रवन्दमानेनसोऽपायान् ।
मुनयश्चिन्वन्ति हृदा प्रवन्दमानेन सोपायान् ।। **12** ।। द्वि. च. पा. य

सृजतोऽण्डं यस्य पुरा जनि जीवनमरणमुक्तिसंसारा ः ।
वेदाः क्रीडा जगतः जनिजीवनमरणमुक्तिसंसाराः ।। **13** ।। द्वि. च. पा. य

यं श्रुतिराह ब्रह्म सदानन्दमयज्ञसत्यचित्तत्वम् ।
यद्विज्ञानाय तपो दानं दमयज्ञसत्यचित्तत्वम् ।। **14** ।। द्वि. च. पा. य

यः पुण्डरीकदृगयादहराकाशेशमादित्यम् ।
यं विदुरष्टगुणयुतं दहराकाशे शमादित्यम् ।। **15** ।। द्वि. च. पा य
विशतीर्जगतां दधतं प्राणमतापास्तमोहतागाद्याम् ।
एत्यधियं सुरपरिषत् प्राणमतास्तमोहतागाद्याम् ।। **16** ।। द्वि. च. पा. य

साक्षात्कृत्य श्रौतं वस्तु तदेवं समन्ततो विभया ।
दीप्रं सुरपरिषदसावस्तुत देवं समं ततो विभया ।। **17** ।। द्वि. च. पा. य

परमे केचित्त्वत्स्तुतिमीहित्वा मानवा महैस्थाने ।
मोदन्तेऽतो हन्तामी हि त्वामानवामहै स्थाने ।। **18** ।। द्वि. च. पा. य

वेदा गुणसीम्नि तवैके यत्ता गुणनिका येषु ।
ते ये शतमिति दृष्टा केयत्ता गुणनिकायेषु ।। **19** ।। द्वि . च . पा . य

तास्त्वयि विविदुः परमज्योतिष्टोमदिका या गाः ।
तेऽप्याराधनमिह ते ज्योतिष्टोमदिका यागाः ।। **20** ।। द्वि. च. पा. य

तदसि यदाम्नायगिरा जगदे तत्त्वं परं परया ।
सृजति हि महदादिकया जगदेतत्त्वं परम्परया ।। **21** ।। द्वि.च. पा य

बिभृषे हि महीयस्त्वं महतोऽरमणोरणीयस्त्वम् ।
देव्याश्श्रियस्सदृश्या महतो रमणोऽरणीयस्त्वम् ।। **22** ।। द्वि. च. पा. य

गुणमुपनिषत्सु भवतोऽसमा पनायाञ्चकार काऽन्यस्य ।
भृत्यानाहुस्सृष्टौ समापनायां च कारकान् यस्य ।। **23** ।। द्वि. च. पा. य

ब्रह्मा त्वयैष जनितः पद्मायतनेऽत्र सन्नेत्रा ।
नित्याऽनपायिनी ते पद्माऽयतनेत्र सन्नेत्रा ।। **24** ।। द्वि. च. पा. य

त्वं हि गजस्याहूतावेषोऽहं तारणाय सन्निहितः ।
इति मुह्यन् कीटस्य सवेषो हन्ता रणय सन्निहितः ।। **25** ।। द्वि. च. पा. य

त्वदुगजनो न दुःखैर्नरके सरिताऽपि वैतरण्याऽभायि ।
भवताऽऽश्रितवात्सल्यन्नरकेसरिताऽपि वै तरण्याभाऽयि ।। **26** ।। द्वि. च. पा. य

वेदैर्भुवनानि तवावासतया ज्ञाप्यमाननि ।
वामनचरणाक्रान्तावासत याज्ञाप्यमानानि ।। **27** ।। द्वि. च. पा. य

भक्तप्रेम्णो गमितो मानवसीमानमोघेन ।
निजतेजसा जनान्भुवि मानवसीमानमोघेन ।। **28** ।। द्वि. च . पा . य

शूर्पणखा शूर्पायतनखरा दीनाऽवधीरणेनाथ ।
याननयत्तान्यस्यन् न खरादीनावधी रणे नाथ ।। **29** ।। द्वि. च. पा. य

सत्वं धृतिश्च युधि किल दशाऽस्येदृश्यतो भयं भवति ।
इति बुद्ध्या निवर्तिते दशास्ये दृश्यतोभयं भवति ।। **30** ।। द्वि . च. पा. य

त्वं संश्रितस्य हि वशे विभीषणस्य प्रभावतो लङ्काम् ।
कुर्वन्नकृथा न मुदं विभीषणस्य प्रभावतोऽलं काम् ।। **31** ।। द्वि . च . पा . य

यमसुरगणं महद्बलमवधीरितवन्तमत्रसन्नेव ।
तं प्राप्ये यं भूर्जनमवधीरितवन्तमत्रसन्नेव ।। **32** ।। द्वि . च . पा . य

कंस इति कालनेमिस्समजनि राजन्यतनुरेकः ।
बहुरितरोऽपि भये तत्समजनिराजन्यतनुरेकः ।। **33** ।। द्वि . च . पा . य

दैत्यभरात्सुखमेषा सा तत्याजायतेक्षणा देव ।
कथमथ लब्धसुखोदयसातत्या जायते क्षणादेव ।। **34** ।। द्वि . च . पा . य

प्रलये त्वामेत्य मही वराह रेजे तरीतारम् ।
अद्यासुरभरात्त्वयि वरा हरे जेतरीताऽरम् ।। **35** ।। द्वि . च . पा . य

भगवन्नविद्म सीमामहो दयायास्तु सक्षमायास्ते ।
तव तादृशो गुणोऽस्या महोदयायास्तु स क्षमा याऽऽस्ते ।। **36** ।। द्वि. च. पा. य

कंसाद्या हिंसन्ति प्रजा न तानज निराचकृषे ।
तत्किं त्वया धरित्र्यां प्रजानता न जनिराचकृषे ।। **37** ।। द्वि. च. पा. य

त्वत्पदयोः प्रणिपतितैर्भवतापचयो निरासेऽधः ।
दुरितस्य कृतोऽद्य यतो भवताऽपचयो निरासेधः ।। **38** ।। द्वि. च. पा. य

धाम्नः परस्य नस्तनुमपरोक्षयतामहो महतः ।
प्रार्थ्यः क इवास्मादलमपरोऽक्षयतामहो महतः ।। **39** ।। द्वि. च. पा. य

इति ते यथामति नुतिं प्रादुर्भावे भिया चितोदयया ।
चक्री च मतिञ्चक्रे प्रादुर्भावेऽभियाचितो दयया ।। **40** ।। द्वि. च. पा. य

ईर्ष्यदृग्वीक्ष्य शनैरम्भोजायामरातीताम् ।
भुवमनुनिन्ये कृतपरिरम्भो जायामरातीताम् ।। **41** ।। द्वि. च. पा. य

सोऽथ स्म स्मित्वा गिरमुदाह सन्तीह तारणाय नयाः ।
यैः क्षेमेक्षिता रिपुचमूर्मुदा हसन्ती हता रणाय न याः ।। **42** ।। द्वि. च. पा. य

असुराणां कार्त्स्न्येन हि जाने शतधा रहस्तदितरे कम् ।
कर्तास्मि भुवि ब्राह्मीजाने शतधारहस्त दितरेकम् ।। **43** ।। द्विं. च. पा. य

जननेन यदुकुलं बहुमनिताहे सुरसदस्समुत् कमनः ।
क्षितिरपि भविता पीडामनिता हे सुरसदः समुत्काः ।। **44** ।। द्वि. च. पा. य

संभाव्य सुतो भूत्वा वसुदेवं सुसमितौग्रसेनीकम् ।
आसुरमन्यैराजावसुदेवं सुसमितौ ग्रसेऽनीकम् ।। **45** ।। द्वि. च. पा. य

शेषेण तत्स्त्रियां तु ज्यायस्यां भाविताऽनेन ।
सूतायां संप्राप्ता ज्या यस्यां भावितानेन ।। **46** ।। द्वि. च. पा. य

स्वगुणेषु तान्प्रकाशं भक्ताहे ये नरहितास्तु ।
द्रक्ष्यन्ति गुणेन हि यम् भक्ता हेयेन रहितास्तु ।। **47** ।। द्वि. च. पा.य

वस्तुं भजतां चक्षुषि जननीत्याऽऽनन्दजायामे ।
अवतरतो व्रजसदना जननीत्या नन्दजाया मे ।। **48** ।। द्वि. च. पा. य

निद्रेयं जनिताऽस्यां मायामोहन्यमानायाम् ।
यस्यां कंसस्य भियामायामो हन्यमानायाम् ।। **49** ।। द्वि. च. पा. य

इति वदतोऽजनि तस्मिन्नन्तर्धिर्विष्टरश्रवसः ।
विषयोऽनन्तोऽप्यस्यानन्तर्धिर्विष्टरः श्रवसः ।। **50** ।। द्वि . च . पा . य

निववृतिरे ते च मनस्सरसा उत्सन्नमस्यन्तः ।
पुरूषं परं रसानां सरसा उत्सं नमस्यन्तः ।। **51** ।। द्वि . च . पा . य

सुमनोभिराप्तधामभिरपीडितैरास्यत स्थिराशान्तैः ।
सुमनोभिराप्तधामभिरपीडितैरास्यत स्थिरा शान्तैः ।। **52** ।। समुद्गयमकम्

।। इति श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरे द्वितीयाश्वासः ।।

श्रीमत्कूरत्ताल्वान् कृत यमकरत्नाकरः

अथ तृतीयाश्वासः

अथ यः किल वसुदेवो ययातिजयदोः परम्पराभावी ।
शक्त्या युक्तोऽरीणां ययाऽतिजयदोः परं पराभावी ।। **1** ।। द्वि . च . पा . य

सोऽयं देवककन्यामुपायतो दाररूपेण ।
भान्तीं कंसावरजामुपायतोदाररूपेण ।। **2** ।। द्वि . च . पा . य

स्निह्यंस्तां कान्त्या सामरातिरेकां ततस्तोकम् ।
कंसोऽवेदस्यां भवमरातिरेकान्ततस्तोकम् ।। **3** ।। द्वि . च . पा . य

रूरुधे स तु स्वसृपती निजगृह एतावतीतशङ्कतया ।
तज्जानथ षड्गर्भान् निजगृह एतावतीतशङ्कतया ।। **4** ।। द्वि . च . पा . य

सा वधतोऽपत्यानामवसन्नाऽथो हि जातानाम् ।
अथ शेषो गर्भोऽस्यामवसन्नाथोऽहिजातानाम् ।। **5** ।। द्वि . च . पा . य

कांसा रक्षां तत्त्विषि रोहिण्यामकृषताज्ञात ः |
विधिरेनं ज्यायस्यां रोहिण्यामकृषताज्ञात ः || 6 || द्वि. च. पा. य

अथ पुण्डरीकनयनं साऽधित सर्वसहासमिता |
गर्भेण मुखं कान्त्या साधितसर्व सहासमिता || 7 || द्वि. च. पा. य

स्थिरचरजातं नयता भूरि वशेऽवधिमतीतेन |
गर्भेण विरजे सा भूरिव शेवधिमती तेन || 8 || द्वि. च. पा. य

जगतीरवन्तमेषाऽमूर्धन्या गौरवकान्ता |
अभृत यथाऽऽम्नायानां मूर्धन्या गौरवकान्ता || 9 || द्वि. च. पा. य

अथ निशि निद्रानुसृतेरक्षिषु कुमुदस्य मानहृत्सु परम् |
मोहं प्राप्याधिकृतां रक्षिषु कुमुदस्यमान्हृत्सु परम् || 10 || द्वि. च. पा. य

यच्चिदचितोस्समुद्भवमक्षरमाद्यं तयोस्सदाध्येयम् |
यद्वक्ति च वेदानामक्षरमाद्यन्तयोस्सदाऽध्येयम् || 11 || द्वि. च. पा. य

तं साऽसूत भवार्णवघनपोतं हरिदिवाकरं भानाम् |
अधिपमिव निर्मलं द्यौर्घनपोतं हरिदिवाकरं भानाम् || 12 || द्वि. च.पा. य

प्रागेव बलेनाजनि रोहिण्यामुदितमनुजेन |
कृष्णेन ततश्श्रावणरोहिण्यामुदितमनुजेन || 13 || द्वि. च. पा. य

रामं तुल्यं भेजे हरिणा भा तं घना भेन |
श्यामलकोमलवपुषा हरिणा भातं घनाभेन || 14 || द्वि. च. पा. य

प्रासदतां तेनाग्निप्रभञ्जनौ जायमानेन |
अजनि सतां मन उदितप्रभं जनौजायमानेन || 15 || द्वि. च. पा. य

समदीपि दिशां येऽन्तस्स नीरजीभावमापाद्य |
शुभममरगणस्सेन्द्रस्सनीरजी भावमापाद्य || 16 || द्वि. च. पा य

भावं तदार्षयः कृतनमसोन्नमना रतं कमपि ।
भेजुस्तेषामैषीन्न मनोऽन्नमनारतं कमपि ।। 17 ।। द्वि. च. पा. य

जातस्सोऽयं प्रविशति सब्रह्मकमण्डलोऽस्तो यम् ।
इति गृणतेऽदुः प्रार्थ्य च सब्रह्म कमण्डलोस्तोयम् ।। 18 ।। द्वि. च. पा. य

नृत्यन्ति स्मैके परिरमन्ति केचित्तमध्ययानपरे ।
अन्येऽस्य पदे दधिरेऽरमन्तिके चित्तमध्ययानपरे ।। 19 ।। द्वि. च. पा. य

जगदुश्च परमपुरूषजननं दमितासुरं जयतात् ।
तत्कीर्तिर्दिक्षु द्यां जननन्दमितासु रञ्जयतात् ।। 20 ।। द्वि. च. पा. य

आश्चर्यमहो कृष्णो मनुजगृहेऽसौमनस्यमित ः ।
अवतीर्य सप्तलोकीमनुजगृहे सौमनस्यमित ः ।। 21 ।। द्वि. च. पा. य

साक्षाज्जगतां नाथो भूमावेषोऽपमायतोपायात् ।
जातो है हन्तामितभूमा वेषोपमा यतोऽपायात् ।। 22 ।। द्वि. च. पा. य

भक्तान् पश्यन् किमसौ प्रतिमोहिस्वान्तरागमित ः ।
मानुषलोके तैर्योऽप्रतिमो हि स्वान्तरागमित ः ।। 23 ।। द्वि. च . पा. य

त्रातुं प्रजा भुवि मयेमाः चर्य जननमस्यात ः ।
इति यदुदैत्किल मानसमाश्चर्य जननमस्यात ः ।। 24 ।। द्वि. च. पा. य

याऽद्यासंभ्रमका ननु मूढा शेमुष्यतेजनेयमिता ।
अद्य हि हरिपदभक्त्यामूढाशे मुष्यते जने यमिता ।। 25 ।। द्वि. च. पा. य

यैर्यत्कृतमकृताच्युतकथमास्ये तत्र पापे तैः ।
अददभिरग्निमिद्धं कथमास्येत त्रपापेतैः ।। 26 ।। द्वि. च. पा. य

कृष्णे परमा नवता मानवतायामिता जज्ञे ।
भजता नियमानवता मानवता याऽमिता जज्ञे ।। 27 ।। द्वि. च. पा. य

इति मुदार्षयो जगुरितगुह्यकविद्याधरास्सिद्धाः ।
ननृतुश्च सहाप्सरसो गुह्यकविद्याधरास्सिद्धाः ।। 28 ।। द्वि. च. पा. य

दिवि देवगणः पुष्पैस्सह सानकदुन्दुभिस्समयात् ।
प्रागेव प्रतिबुबुधे सहसाऽऽनकदुन्दुभिस्समयात् ।। 29 ।। द्वि. च. पा. य

देवक्या संप्रीतिः का लेभेऽजे प्रजाते न ।
सर्वाऽपि हर्षमस्मिन् काले भेजे प्रजा तेन ।। 30 ।। द्वि. च. पा. य

जाते जगतां नाथे श्रीवत्साङ्के भृतप्रमदा ।
स्निह्यन्ती कान्तिमती श्रीवत् साऽङ्केऽभृत प्रमदा ।। 31 ।। द्वि. च. पा. य

वसुदेवो देवक्या समगत बब्धावमानतया ।
विस्मितया पुत्रे स्वे समगतबन्धावमानतया ।। 32 ।। द्वि. च. पा. य

दैत्यरुचः क्षपयन्तं कुवलयदलनीरधिप्रख्यम् ।
तमुदैक्षेतां पितरौ कुवलयदलनीरधिप्रख्यम् ।। 33 ।। द्वि. च. पा. य

पितरावेवं तस्मायाशासाते स्म देवास्तु ।
ददतु च बुद्धिं या नो वाऽऽशा सा तेऽस्मदेवास्तु ।। 34 ।। द्वि. च. पा. य

अथ देवक्यत्युज्ज्वलसुतरामा सीदति स्म यतः ।
कंसोऽरिस्स्वसुतानां सुतरामासीदति स्म यतः ।। 35 ।। द्वि. च. पा. य

स चकितमभितस्तस्मिन्नायतने त्रस्तया कुरङ्ग दृशा ।
ऐक्षि सुतोऽप्यैक्षि लसन्नायतनेत्रः तया कुरङ्गदृशा ।। 36 ।। द्वि. च. पा. य

व्यलपत्कृत्वाऽस्य महासङ्गतया स्वज्जनं समया ।
तन्त्र्या स्वगिरा भीत्या सङ्गतया स्वं जनं समया ।। 37 ।। द्वि. च. पा. य

कंसात्कथन्न उद्यन्महामनागूहितव्योऽनु ।
गूढो न कंसपक्ष्यैर्महामना गूहितव्यो नु ।। 38 ।। द्वि. च. पा. य

परमं धाम हि महदिदमभ्रश्यामाकृति श्रेयः ।
द्रक्ष्यति कंसो हा वयमभ्रश्यामाकृतिश्रेयः ।। 39 ।। द्वि. च. पा. य

संशृणुत गीयमानां स्त्रिया मया गामिमामार्याः ।
श्रीमत्या श्रीमन्तः त्रियामया गामि मा माऽऽर्याः ।। 40 ।। द्वि. च. पा. य

क इमं रक्षेत्क्व च मे मातापितरौ स्वसारो वा ।
मय्यन्तर्वा प्रविशन् मा तापि तरौ स्वसारो वा ।। 41 ।। द्वि. च. पा. य

काऽस्यानुभवे प्रति नावन्यवशावञ्चिते वार्ता ।
इति भीता व्यलपत्सा वन्यवशा वञ्चितेवार्ता ।। 42 ।। द्वि. च. पा. य

वसुदेवस्तां स्माहोपरि देवनमस्यनादेयम् ।
इष्टमरिष्टं बाले परिदेवनमस्य नादेयम् ।। 43 ।। द्वि. च. पा. य

स स्वत्राणे शरणं निशामयन्तौ सहासने त्रस्तौ ।
अयुजदबद्धयोचितया निशामयन्तौ सहासनेत्रस्तौ ।। 44 ।। द्वि. च. पा. य

अथ वसुदेवस्यासीत्सानन्दस्याङ्गनामान्या ।
बुद्धिरधुनाऽमुना मे सा नन्दस्याङ्गना मान्याा ।। 45 ।। द्वि. च. पा. य

जगृहेऽथ सुतं दोर्भ्यामुन्नसमाजानुभावभुजम् ।
विरहशुचा तं भेजे मुन्न समाऽजानुभावभुजम् ।। 46 ।। द्वि. च. पा. य

तं करयुगे वहन् भरसहेऽतिराजन्तमनुदरं सुकरम् ।
ऐक्षत निषेवमाणं स हेतिराजं तमनु दरं सुकरम् ।। 47 ।। द्वि. च. पा. य

आहुर्य पतिमत्रानन्तमहीनामितस्वधामानम् ।
तमपि ददर्श भिया यानन्तमहीनामितस्वधामानम् ।। 48 ।। द्वि. च. पा. य

तं चैक्षत येन भृता सुधामरूद्धामतस्सुधर्मेतेन ।
द्यां विदधता स्थितेन तु सुधा मरूद्धामतः सुधर्मे तेन ।। 49 ।। द्वि. च. पा. य

विनतापदामयन्तं व्रिजमानं दधानमनुभावम् ।
विनतापदामयं तं विराजमानन्दधानमनुभावम् ।। 50 ।। द्वि. च. पा. य

स वहन् कृष्णं स्वस्मान्निशान्ततस्तारकं निरयात् ।
वीक्ष्याब्दै स्थगयन्तीं निशां ततस्तारकं निरयात् ।। 51 ।। द्वि . च. पा. य

यत्फणमणिरूचिरभजद्रुचिराऽच्छा द्यामिताशं सः ।
शेषोऽन्वैद्वर्षे तद्रुचिराच्छाद्यमिताशंसः ।। 52 ।। द्वि. च. पा. य

सह रक्षिणोऽपि सुषुपुर्द्विजघटया तत्परा वृत्तेः ।
अखिलकवाटैराराद्विजघटयातत्परावृत्तेः ।। 53 ।। द्वि. च. पा . य

स पिबन् सुतमधु राया द्योतितरथ्याभुवस्तथा मधुराया ः ।
भोगैरतिमधुराया निरगमदुपरामिकामिनर्मधुराया ः ।। 54 ।। समुच्चययमकम्

यमुना तत्क्षणशुष्के वने नदी प्रायशोऽदासीत् ।
शयनन्यस्ते तु हरावनेन दीप्रा यशोदाऽऽसीत् ।। 55 ।। द्वि . च. पा. य

ऐक्षत ततो व्रजमिमं तमसाऽऽवृतमभिततस्वापम् ।
मेने कंसात्क्षेमं तमसावृतमभि ततः स्वापम् ।। 56 ।। द्वि. च. पा. य

मायां जातां तत्रोपादाय स दारिकामनाशाय ।
अमत शमस्मै सरसिजपादाय सदाऽरिकामनाशाय ।। 57 ।। द्वि. च. पा. य

पत्न्यै नयन् स तामथ निववृत एकान्ततः पृथकाम् ।
अकृत च तां प्रीत्या सन्निव वृत एकां ततः पृथकाम् ।। 58 ।। द्वि . च. पा. य

उषितमनिगुह्य कंसात् कुमारिकान्यासतस्तेन घ्नन् ।
स तयोक्तोऽस्ति तु तव वै कुमारिकाऽन्याऽसतस्तेन घ्नन् ।। 59 ।। द्वि. च. पा. य

उदितः फणिनमत्रानवमेनेनेन साकं सः ।
हरिरिति गिराऽवरीयानवमेनेऽनेनसा कंसः ।। 60 ।। द्वि. च. पा. य

अथ कंसो भगिनीं पतिममुं च तावत् स लोपितान्तेन ।
तमसाऽऽप्तेन हृदा स्फुटममुञ्चतावत्सलोऽपि तान्तेन ।। 61 ।। द्वि. च. पा. य

सममतनुत निर्बन्धावथोऽक्षजं काममवयन्तौ ।
सममत नुतनिर्बन्धावधोक्षजं काममवयन्तौ ।। 62 ।। समुद्गयमकम्

इति श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरे तृतीयाश्वास ः ।।

श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नकरः

अथ चतुर्थाश्वास ः

अथ या व्रजगान्निद्रा धीचोरी कृत्यसादान्ता ।
बोधं गोपालकुलेनाधीचोरीकृत्य सा दान्ता ।। 1 ।। द्वि. च. पा. य

बोधन्तीं तु यशोदां तामरसदृशं विभा वर्याम् ।
वव्रेऽथ सैक्षत सुतं तामरसदृशं विभावर्याम् ।। 2 ।। द्वि. च. पा. य

भेजे दशां तु मनसाकामन्तरसौ रसं प्रयता ।
भुद्ध्वैनमयादखिलं कामं तरसौरसं प्रयता ।। 3 ।। द्वि. च. पा. य

सोदभुतमर्चिः श्रितसुतभूयो भूयोनि चायन्त्या ।
परिरभ्य तया दध्रे भूयो भूयो निचायन्त्या ।। 4 ।। द्वि. च. पा. य

श्लिष्यन्ती स्म सुताह्वयमाम्रेडयतेऽभ्रमर्यमिता |
पुष्यति यथा हि चिरतरमाम्रे डयते भ्रमर्यमिता || 5 || द्वि. च. पा. य

अथ सह पश्यन्ती तं सा नन्देनाननन्द धानेन |
पुण्यस्यातिविकसितं सानन्देनाननं दधानेन || 6 || द्वि. च. पा. य

मोहाज्जन्म तु नामत दुर्गायास्सा धुताधिका नियतेः |
अथ गोपा विप्रेभ्योऽदुर्गा याः साधुताधिकाः नियतेः || 7 || द्वि. च. पा. य

वक्तृभ्यो धनमुरूगुरूविभा वितेरूरूपरि प्लुतायिपदम् |
जगुरथ ननृतुर्जन्मनि विभाविते रूरूपरिप्लुतायिपदम् || 8 || द्वि. च. पा. य

ददुरूधसा लसन्तीः कपिला लसता विलंबिना महता |
हर्षजचेष्टा चैषां कपिलालसताविलंबिनामहता || 9 || द्वि. च. पा. य

हृष्टास्सबालवृद्धा हस चल पत रात जहि हिनुत |
एवं चक्रुर्भूयो ह सच लप तरात जहिहि नुत || 10 || द्वि. च. पा. य

माङ्गलिकं व्रजजनमुदमुत्कर्षि व्याववाद्यमितम् |
अप्रथयद्धरिगुणगणमुत्कर्षिव्याववाद्यमितम् || 11 || द्वि. च. पा. य

निरतास्स्नेहात्तु हरावनिमेषममेक्षणे नार्यः |
जगदुश्श्रुतमेतन्नोऽवनिमेष ममे क्षणेनायः || 12 || द्वि. च. पा. य

दिष्ट्या नन्दस्य स्नुतपयोधरा भाति रमणीयम् |
लब्धासुतं सनूतनपयोधराभातिरमणीयम् || 13 || द्वि. च. पा. य

वटपल्लवशय्यां प्रागर्भकमवितुङ्गतं प्रजा गरणेन |
आहुरिममण्डकोटीगर्भकमवितुङ्गतं प्रजागरणेन || 14 || द्वि. च. पा. य

सोऽयं यं वेद महान् हिरण्यगर्भो न वेद वा गूढम् |
न तु भक्तश्शिशुरपि सन् हिरण्यगर्भो न वेदवागूढम् || 15 || द्वि. च. पा. य

शिशुनाऽनेन पुराऽजनि गोत्रामात्रा तु कामेन ।
सदृशाऽधुना तथाऽजनिं गोत्रामात्रातुकामेन ।। 16 ।। द्वि. च. पा. य

निधिमिव लेभे नन्दः पङ्कजनेत्रमतिमानुषाकारम् ।
वदनेन जयन्तमिममपङ्कजनेऽत्र मतिमानुषाकारम् ।। 17 ।। द्वि. च. पा. य

ईदृशमिमं हृदि भक्तैः स्वञ्जननीकाशमानेयम् ।
लेभे कथमिव तनयं स्वं जननी काशमानेयम् ।। 18 ।। द्वि. च. पा. य

श्रीमन्मुखं परिपतद्भ्रमरकराजीवहार्यस्य ।
तल्लक्ष्मीर्हि विराजद्भत्रमकराजीवहाऽऽर्यस्य ।। 19 ।। द्वि. च. पा. य

एते नेत्रे विश्वं विभाजयन्ती सुतारके भवतः ।
वसतिर्लक्ष्म्याः पाद्मीः विभा जयन्ती सुतारके भवतः ।। 20 ।। द्वि. च. पा. य

अस्मद्धियमिह वीक्षितमस्य ग्रसमानमश्रान्तम् ।
अरिहृदयदारणे स्फुटमस्यग्रसमानमश्रान्तम् ।। 21 ।। द्वि. च. पा. य

मुखरूचिमभि सदृगलकावलिकां तरलालितानेन ।
तिलकरूचिरीयतेऽसावलिकान्तरलालिताऽनेन ।। 22 ।। द्वि. च. पा. य

सृष्टा यदा महीयं निरगच्छदना कुलाचलोपेता ।
वदनात्तदा श्रुतिरितो निरगच्छदनाकुला च लोपेता ।। 23 ।। द्वि. च. पा. य

कम्बुनिभयास्मदसुखं कन्धरया साद्यतेऽधुनाऽनेन ।
येन हि दुःखमशेषं कं धरय साद्यते धुनानेन ।। 24 ।। द्वि. च. पा. य

गजपतिना बधिरितककुबाहूतस्यास्यतो लयतः ।
मन्दरमिमौ स्म मथने बाहू तस्यास्य तोलयतः ।। 25 ।। द्वि. च. पा. य

आत्मानं यो जगतां राज नूतनयते तस्य ।
भातौ भुजौ व्रजपतेराजानू तनयेतस्य ।। 26 ।। द्वि. च. पा. य

धाम्ना ल्क्ष्म्यास्सश्रीवत्सेन विभातिरिक्तेन |
पृथुना दोषैर्वत्सो वत्सेन विभाति रिक्तेन || 27 || द्वि. च. पा. य

अस्य युगान्ते सकला अत्रासतया तमोहस्य |
शातेऽप्युदरे लोका अत्रासत यातमोहस्य || 28 || द्वि. च. पा. य

शयितोऽयमसृजदस्यां नाभ्यां चतुराननं तोये |
पद्भ्यां ममे च लेकानाभ्यां चतुराननन्तोऽये || 29 || द्वि. च. पा. य

एतौ भुवं कमित्वोदहरेतामरसमध्येयौ |
सरसं ध्येयौ चरणौ दहरे तामरसमध्ये यौ || 30 || द्वि. च. पा. य

उच्चैरोजायेते तले ये इमे सरोजायेते |
जगति पुरोऽजायेते प्रकाशमभजतां तिरोजायेते || 31 || द्वि. च. पा. य

चान्द्रान्नखा अमुष्येव न जयन्ते कराननपदस्य |
रूपाणि तत्क्षणस्फुटवनजायन्ते कराननपदस्य || 32 || द्वि. च. पा. य

नात्माऽंहसोऽब्जपत्रगजलवल्लवमध्यगच्छन्नः |
येनानुभूयतेऽसौ जलवल्लवमध्यगच्छन्नः || 33 || द्वि. च. पा. य

इति तृप्तिं हरिदृष्टावनितानामुदितमुत्कानाम् |
अश्रावि तत्र घोषे वनितानामुदितमत्किानाम् || 34 || द्वि. च. पा. य

त्रातुमथ रोहिणीं सहबलभद्रां शूरतनयेन |
वव्र नन्दसुतकृतबलभद्रांशू रतनयेन || 35 || द्वि. च. पा. य

नन्दोऽप्यनपेतौ प्रियगुरूभौ मेने हि तनयत्वात् |
वेत्ति हि रसेन सख्यं गुरू भौमेनेहितनयत्वात् || 36 || द्वि. च. पा. य

गर्गो विदन् क्रियाणां चतुरः पङ्क्तीस्समुच्छ्रितो विधिवत् ।
संस्कारानकृत तयोश्चतुरः पङ्क्तीस्मुच्छितो विधिवत् ।। 37 ।। द्वि. च. पा. य

शयिते हरौ कदाचित्पूतनयाऽऽगामि वाव साऽऽदाय ।
स्त्रीवेषमभात्प्राप्ताऽपूतनया गामिवावसादाय ।। 38 ।। द्वि. च. पा. य

कंसस्य नियुक्ताऽसावषडक्षीणेन मन्त्रेण ।
श्रौतेन याज्यमैक्षत वषडक्षीणेन मन्त्रेण ।। 39 ।। द्वि. च. पा. य

किं हन्त सा तु तत्रानवमे चकमेऽघजातीया ।
द्वेष्या कथमस्य तनुर्नवमेचकमेघजातीया ।। 40 ।। द्वि. च. पा. य

साध्वीव स्तनमेनं सा गरवद्धापयामास ।
जीवितमस्यास्स विदा सागरवद्धापयामास ।। 41 ।। द्वि. च. पा. य

घ्नन् जिह्वया पिशाचीमत्रस्नुतया विषादिन्या ।
ऐक्षि जनन्यानुपदमत्र स्नुतया विषादिन्या ।। 42 ।। द्वि. च. पा. य

तं सा जग्राह गरं पयायमनं समाधाय ।
तन्मुक्तार्तरवभियोपयायमानं समाधाय ।। 43 ।। द्वि. च. पा. य

अभ्येत्य श्रुतयाऽथ निरंहः पुण्या ह घोषमूर्च्छनया ।
ब्रह्मविदोऽशमयन् भयरंहः पुण्याहघोषमूर्च्छनया ।। 44 ।। द्वि. च. पा. य

कृष्णस्य कृते चकितप्रजे पुरे केचनाभिजातस्य ।
जुहुपुर्विप्रास्सदृशाः प्रजेपुरेकेचनाभिजातस्य ।। 45 ।। द्वि. च. पा. य

नन्देन भीर्मुकुन्दाभिनवस्यातनुतया निजाऽयापि ।
किञ्च शुभानि सुतस्याभिनवस्यातनुत यानि जायाऽपि ।। 46 ।। द्वि. च. पा. य

नन्दस्य बिभ्यतस्संशय्यादेशेन वेदान्तैः ।
ईड्योऽशायि स विप्रश्शय्यादेशे नवे दान्तैः ।। 47 ।। द्वि. च. पा. य

मन्त्रौषधिमुख्यैः कृतरक्षां सीमामतन्वतोपायैः ।
शं च गतां संयोज्य तु रक्षांसीमामतन्वतोऽपायैः ।। 48 ।। द्वि. च. पा. य

मन्त्रैरतिष्ठपन् कृतसिद्धार्थकराजयो दधानानि ।
क्षीरतरूपल्लवांस्ते सिद्धार्थकरा जयोदधानानि ।। 49 ।। द्वि. च. पा. य

शयितोऽन्यदाऽन्तिकगतमनस्सपर्यास्थतामितया ।
पादाङ्गुल्याश्रितजनमनस्सपर्यास्थतामितया ।। 50 ।। द्वि. च. पा. य

असुराख्यविपद्यार्दनकरवदनस्याततोऽऽयि तया ।
शलभत्वमर्चिषोऽम्बुजकरवदनस्याततायितया ।। 51 ।। द्वि. च. पा. य

हतमसुरांहस्तत्स्वोपर्यासितमङ्गहारवतः ।
व्याञ्जीत्पदास्यशकटं पर्यासितमङ्गहारवतः ।। 52 ।। द्वि. च. पा. य

सुरनरकुलमवितुं हरिरूदितस्तन्न्यायपदवीर्यात् ।
इत्थं जघान संश्रितरूदितस्स्तन्याय पदवीर्यात् ।। 53 ।। द्वि. च. पा. य

गोपाः प्रेक्ष्यानोऽस्तं विचिकित्सं ते नगोपमानमितम् ।
कृष्णं स्म भीमचरितं विचिकित्सन्ते न गोपमानमितम् ।। 54 ।। द्वि. च. पा. य

आगाम्यथास्य मत्रा मङ्गलया देवतावदधिकान्त्या ।
मूर्च्छासीदेवतस्यामङ्गलयादेव तावदधिकान्त्या ।। 55 ।। द्वि. च. पा. य

वीक्ष्यास्य विलसितं धीश्शताङ्गनाशान्तमान सताम् ।
न तु साऽगाच्छङ्कितभयशताऽङ्गना शान्तमानस्ताम् ।। 56 ।। द्वि. च. पा . य

हतमन उदीक्ष्य धामादाय तनयनाम नो रथाद्धीनम् ।
प्रणिपत्य हरिं सास्तौदायतनयना मनोरथाद्धीनम् ।। 57 ।। द्वि. च. पा. य

देवजनेऽनन्यगतौ यच्छ कटाक्षं समर्यादे ।
बिभिमश्शिशुना ध्वस्तं यच्छकटाक्षं समर्यादे ।। **58** ।। द्वि. च. पा. य

रक्षोभयकर सुकृतां जलिमानितधीरताधार ।
रक्षोभयकरसुकृताञ्जलिमानित धीरताधार ।। **59** ।। समुद्गयमकम्

।। इति श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरे चतुर्थाश्वासः ।।

श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरः

अथ पञ्चमाश्वासः

कृष्णस्तनन्धयदशा बहुमत्याज्यामलञ्चक्रे ।
तद्भक्तिश्च भुवि जनं बहुमत्याज्याऽमलं चक्रे ।। **1** ।। द्वि. च. पा. य

स हसेन गिरं वामाक्षीराहारादशातेन ।
तत्प्रीत्यै खलु भेजे क्षीराहारा दशा तेन ।। **2** ।। द्वि. च. पा. य

अब्जमिवाब्जसमेतं सदास्यगस्वच्छविप्रपदम् ।
कुर्वन् तदङ्गुल्मिधात् स दास्यगस्वच्छविप्रपदम् ।। **3** ।। द्वि. च. पा. य

आसुरयोनिर्याऽत्र प्रजा तदन्तस्स दाशार्हः ।
कालेन केनचिदभूत्प्रजातदन्तः सदाशार्हः ।। **4** ।। द्वि. च. पा. य

तमसः परमेणत्वभिजातमहोदन्तजातेन ।
पूर्वेषां पूर्वेण च जातमहो दन्तजातेन ।। **5** ।। द्वि. च. पा. य

मुखमुदितद्विज़राजद्द्विजराजगतीह मानेन ।
वहताऽमोदन्त चिराद्विजरा जगतीहमानेन ।। **6** ।। द्वि. च. पा. य

जगतां चयं क्षये यो दधदाशाम यतां स मायातः ।
मातुस्स्तन्यमिहैषोऽदधदाशामायतां समायातः ।। 7 ।। द्वि. च. पा. य

स्तनधाने समभृत करमन्यस्तनतो न पास्यमानतया ।
अनुकुर्वन् गास्स शिशुम्मन्यस्स्तनतोऽनपास्यमानतया ।। 8 ।। द्वि. च. पा. य

स पिबन् स्तनमपरं किल सुकरेण सदङ्गुलीयमानेन ।
आस्फालयदम्बुजसमसुकरेण सदङ्गुलीयमानेन ।। 9 ।। द्वि. च. पा. य

मौग्ध्येन ययौ घृष्ट्वा स्वजानुनी त्यज्यमानेन ।
प्रापि सुखेन यशोदा स्वजानुनीत्यज्यमानेन ।। 10 ।। द्वि. च. पा. य

दधदनुपदमाघ्रातौ स हनू पुरघोषवनिताभिः ।
चक्रीड च हंसीभिस्सह नूपुरघोषवनिताभिः ।। 11 ।। द्वि. च. पा. य

स्वगतिं स्मच्छाया तनुजानुकरोतीतरोऽधो यन् ।
शिशुरित्यमन्यतार्पितजानुकरोऽतीतरोधो यन् ।। 12 ।। द्वि. च. पा. य

स्नेहादजातविरहेच्छा यामि त्रायमाणतया ।
इति नु यती प्रीतिमधच्छाया मित्रायमाणतया ।। 13 ।। द्वि. च. पा. य

या छाया किल भद्रङ्कराऽस्य चेष्टाऽभिरामा हि ।
सा त्वभिभाषणपूर्वं करास्यचेष्टाभिरामाहि ।। 14 ।। द्वि. च. पा. य

भयमकृतास्य रविवशादधिकामानेन साच्छाया ।
धीर्येनाधायि च कृतदधिकामाऽऽनेनसा ऽच्छा या ।। 15 ।। द्वि. च. पा. य

छायासुहृदा सजलं करकमलङ्कुर्वता शशुभे ।
संस्प्रष्टुमैहि करके करकमलं कुर्वताऽऽशु शुभे ।। 16 ।। द्वि. च. पा. य

तेनैषि किलोत्थाने करशाखालम्बता व्यवधिकेन ।
येनार्थ्यश्रुतिरतिशुभकरशाखाऽलं बताव्यवधिकेन ।। 17 ।। द्वि. च. पा. य

दधिमुष ऐक्षन्त पदे क्रमेण यस्ते नरो दस्योः |
बलिसविधगेन माता क्रमेण यस्तेन रोदस्योः || 18 || द्वि. च. पा. य

चेष्टाभिरभत्स हि नृननुकुर्वन् हस्त्यमुख्याभिः |
भात्यसदपि लीलाभिर्ननु कुर्वन् हस्त्यमुख्याभिः || 19 || द्वि. च. पा. य

अलभत स पुरोवर्तिाि काकेऽतीवाक्षरसदे शम् |
तस्य तु रवमनुकुर्वन् काकेतीवाक्षरसदेशम् || 20 || द्वि. च. पा. य

यश्शिशुरिह क्रमित्वा प्रागादित बलिभुजे सितां पृथ्वीम् |
भिस्सां स दातुमग्रे प्रागादितबलिभुजे सितां पृथ्वीम् || 21 || द्वि. च. पा. य

लौल्याद्दीपं स्प्रष्टुं परमादुद्रावमेघानाम् |
प्रतिगर्जन्यो हन्तोपरमादुद्रावमेघानाम् || 22 || द्वि. च. पा. य

न भयं किल यं मोक्षाध्वान्तं यन्ना मतो न श्येत् |
सोऽयमभैषीद्ध्वान्ताद्ध्वान्तं यन्नामतो नश्येत् || 23 || द्वि. च. पा. य

सेन्दौ कुर्वन् स तु धृतमुद्दिश्यक्षि प्रदेशिन्या |
ऐहत विधुमागमयितुमुद्दिश्य क्षिप्रदेशिन्या || 24 || द्वि. च. पा. य

स्मासुर इह कंसादौ न क्षत्रे शस्यतेऽजो यः |
सोऽरमत सखिपरिवृतो नक्षत्रेशस्य तेजोयः || 25 || द्वि. च. पा. य

अग्निस्पर्शेऽतायत गुञ्जा पुञ्जाऽनुदीक्षमाणेन |
त्रेसे च गोपनिचितान् गुञ्जापुञ्जानुदीक्षमाणेन || 26 || द्वि. च. पा. य

पश्यन्मुनीन् स जटिलान् दण्डभृतो दरमहोदन्तान् |
अबिभेदुक्तस्वविलसदण्डभृतोदरमहोदन्तान् || 27 || द्वि. च. पा. य

तं भूषणमबुभूषत् स वयोजाती यमुरूरयतः |
वत्सकुलमन्वधावत् सवयोजातीयमुरूरयतः || 28 || द्वि. च. पा. य

तेन कृतं वत्सेष्वितरहः कथं चित्तमाशयेतेन ।
न स्म पितरौ रतं बहिरहः कथं चित् तमाशयेते न ।। 29 ।। द्वि. च. पा. य

स्वं न्यस्य शयितवत्ससदेलकेऽलिकमलकमालापि ।
तत्र बभावप्यनुकृतसदलिकेलिकमलकमालापि ।। 30 ।। द्वि. च. पा. य

सखिजनमनुसृत्य प्रति सङ्कर्षणतः स सारवत्समयम् ।
अनुकृतरवो वालधिसङ्कर्षणतः ससार वत्समयम् ।। 31 ।। द्वि. च. पा. य

वृषभेणोहे त्रय्याऽनुपाधिरूढस्तदा शयानेन ।
स्पृशता ककुदं यो भाननुपाधिरूढः तदाशयाऽनेन ।। 32 ।। द्वि. च. पा. य

कुतूहली स भृशमुरावासारे मेघनादवति ।
स्नेहान्नन्दे सासितवास रेमे घनादवति ।। 33 ।। द्वि. च. पा. य

पङ्कक्षये श्रुतिर्य महती है क्षिप्रसाधनं नव्यम् ।
ब्रूते पङ्को लीलां महतीहैक्षि प्रसाधनं नव्यम् ।। 34 ।। द्वि. च. पा. य

बध्नन्निजमायायां विभावरीभानुपरिकर्मा ।
पांसुभिररमत लेपितविभावरीभानुपरिकर्मा ।। 35 ।। द्वि. च. पा. य

आशिशदृभून् द्विषां योऽपां सुरसं हननतानेन ।
पांसुभिरपि विहरता पांसुरसंहननताऽनेन ।। 36 ।। श्रि. च. पा. य

श्रियमस्य रजोऽप्याङ्गं सदानतस्याप रन्तुमुदितस्य ।
स हि दूष्यतोऽपि गुणकृत् सदा न तस्यापरं तु मुदितस्य ।। 37 ।। द्वि. च. पा. य

मुक्तिं रजसो यो हतरजस्तमास्तरणतोऽयच्छत् ।
स्वस्मिन् लीलाभरणं रजस्तमास्तरणतोऽयच्छत् ।। 38 ।। द्वि. च. पा. य

मनसैव यस्त्रिलोकीं निर्माय तयाऽऽप रंरम्याम् ।
स रतिमगात् पांसुगृहे निर्मायतया परं रम्याम् ॥ 39 ॥ द्वि. च. पा. य

सह सोऽरंस्त यशोदामातततया मानयन्तीभिः ।
कन्याभिः प्रीत्या स्फुटमातततयाऽमा नयन्तीभिः ॥ 40 ॥ द्वि. च. पा. य

पदपद्ममृदितजनिताक्षिप्रमदकरेणु गेहागः ।
क्रोधयितुमगात् कन्याः क्षिप्रादकरेणुगेहागः ॥ 41 ॥ द्वि. च. पा. य

भक्ष्यैर्यशोदया स तु साम्ना चर्चावता यजुषा ।
श्नातुमरूध्यत बोध्यस्साम्ना चर्चाऽवता यजुषा ॥ 42 ॥ द्वि. च. पा. य

तमथाशया कवोष्णितवार्यामलकान्तिकाऽऽयतया ।
अस्नपयद्भान्तमसावार्याऽमलकान्तिकायतया ॥ 43 ॥ द्वि. च. पा. य

द्यौरिव तमपो नवमिव पयोधिपाकं समुद्दिशती ।
सा स्नपयदनुच्छन्दा पयोऽधिपाकं समुद्दिशती ॥ 44 ॥ द्वि. च. पा. य

सा स्नापयदघघातप्रभविष्णुपदं सुसज्जनाधारा ।
निर्मलमिवासिधाराप्रभविष्णुपदं सुसज्जना धारा ॥ 45 ॥ द्वि. च. पा. य

बालातपीव जलधिर्हिरण्यहारिक्षपोदितमहा घोरम् ।
संक्षाल्य रजश्शुशुभे हिरण्यहाऽरिक्षपो दितमहाघोऽरम् ॥ 46 ॥ द्वि. च. पा. य

संस्नाप्य तमामोदित नीराजनतः परा कृता रिष्टम् ।
भक्तेभ्यः क्षिपतोऽस्मान्नीराजनतः पराकृतारिष्टम् ॥ 47 ॥ द्वि. च. पा. य

यो यस्सरिपुषु नृषु तं ससनाभिष्वङ्गरागेण ।
भान्तमपश्यदमुच्यत स स नाभिष्वङ्गरागेण ॥ 48 ॥ द्वि. च. पा. य

गोपा दधतोऽभीक्षितुमाकल्पगमायुराशास्ते ।
सङ्घस्स्म पश्यताममुमाकल्पगमायुराशास्ते ॥ 49 ॥ द्वि. च. पा. य

यः किल विबुधरिपूणां सभा जिता नाशयामास ।
तं भोजयितुं विप्रान् सभाजितानाशयामास ।। **50** ।। द्वि. च. पा. य

योऽस्यन्नुदधृत करिणं सरसोऽपस्करमयं भक्तम् ।
तं साऽऽशिशदनुनीय तु सरसोपस्करमयं भक्तम् ।। **51** ।। द्वि. च. पा. य

समुदाशयदाम्नातं स्वच्छन्दमितैरहस्सुबन्धुं सुकरम् ।
समुदाशयदाम्ना तं स्वच्छन्दमितै रहस्सु बन्धुं सुकरम् ।। **52** ।। समुद्गयमकम्

।। इति श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरे पञ्चमाश्वासः ।।

श्रीमत्कूरत्ताल्वान् अनुगृहीत यमकरत्नाकरः

अथ षष्ठाश्वासः

इह पापकारिणां विदुरेतं हैयं गवीनमोषाय ।
उदयूयुजन्निजा धीरेतं हैय्यङ्गवीनमोषाय ।। **1** ।। द्वि. च. पा. य

यस्य गुणान्न मिमीते सकलकला गव्यमाऽमुष्य ।
अकृत स गृहेषु गोपीस्सकलकला गव्यमामुष्य ।। **2** ।। द्वि. च. पा. य

दधि मुष्णन्नास्थदसावरिष्टघटमानमद्धयेयः ।
तत्पश्यतां मनस्यावरिष्ट घटमानमद्धयेयः ।। **3** ।। द्वि. च. पा. य

भक्ताशयानुकर्तोदधिमथ नेताऽण्डवप्रसितः ।
नवनीतार्थी गोपीदधिमथने ताण्डवप्रसितः ।। **4** ।। द्वि. च. पा. य

दधिमन्थनभाव्यधरितमृदङ्गनानामहारवतः ।
नृत्यन्नैधत तनुधृतमृदङ्गनानामहारवतः ।। **5** ।। द्वि. च. पा. य

सर्वत्र नेत्रपेयं स मधु क्षिप्रचुरमुदवसिते ।
नृत्ते सततं स्त्रीभिस्समधुक्षि प्रचुरमुदवसिते ।। 6 ।। द्वि. च. पा. य

यं सज्जन ऋजुमखिलादधिसारं चोरयामास ।
शिक्यात्स उलूखलगोदधिसारं चोरयामास ।। 7 ।। द्वि. च. पा. य

गोपैस्स कृष्ण उच्चैरनुभवनन्दाधिकामोदैः ।
समभावि विदितपद्धतिरनुभवनं दाधिकामोदैः ।। 8 ।। द्वि. च. पा. य

स्त्रीणामुदगादाशीः क्षयेक्षये सर्वदैवनवनी तम् ।
मुष्णन्तं प्रतिकृष्णं क्षयेक्षये सर्वदैव नवनीतम् ।। 9 ।। द्वि. च. पा. य

जगदस्य मुष्णतोऽपि हि नवनीतमुदारभावेन ।
विष्णुं गोप्तुं लोकानवनीतमुदार भावेन ।। 10 ।। द्वि . च . पा. य

आमोषिणं हसन्तं माताऽवददस्त्वये हसितम् ।
नवनीतं मोषि हरे मा तावददस्त्वयेह सितम् ।। 11 ।। द्वि. च. पा. य

प्रथिता कृष्ण तवोच्चैरसाविह स्तेनता तेन ।
अदित तदेवेभ्यो गोरसा विहस्तेन तातेन ।। 12 ।। द्वि. च. पा. य

यदि शक्नोषि निबद्धस्सन्निहितेनाहमत्रसतः ।
विदधाम्युलूखलेन तु सन्निहि ते नाहमत्र सतः ।। 13 ।। द्वि. च. पा. य

इति स उलूखल उद्धृतदाम्ना योऽनह्यतोद्यतया ।
ऐषि चलितुं किलोक्तसदाम्नायो न ह्यतोऽद्य तया ।। 14 ।। द्वि. च. पा. य

बद्ध्वा गव्यमुषं गृहकार्याय स्तेनमायि तया ।
तेन किल चलितुमीहाऽकार्यायस्तेन मायितया ।। 15 ।। द्वि. च. पा. य

मध्ये जगाम गच्छन्नर्जुनयमयोरसन्देहम् ।
दधतोरसुरमयत्वान्नर्जुनयमयोरसं देहम् ।। 16 ।। द्वि. च. पा. य

गतिलीलयास्य पर्वतसमभा ज्यायस्तया नारम् ।
त्रासयदर्जुनयमलं समभाज्यायस्तया नारम् ।। 17 ।। द्वि. च. पा. य

यस्यामुलूखलतनौ ननाह सा तां प्रकर्षतोग्रगतौ ।
हरिणा दैत्यौ शक्तेर्न नाहसातां प्रकर्षतोऽग्रगतौ ।। 18 ।। द्वि. च. पा. य

श्रुत्वाऽस्थाद्रवमभितावनिभृतमुत्कटकटायन्तम् ।
त्रेसुरिभाश्श्रुत्वाऽस्तावनिभृतमुत्कटकटा यं तम् ।। 19 ।। द्वि. च. पा. य

स्फुरिते तत्र तु पूर्व घोषादावेजितावयोऽतीताः ।
आजग्मुरथ सबाला घोषादावेजिता वयोतीताः ।। 20 ।। द्वि. च. पा. य

आयन्ननामयं तं न नाम यन्तं सदा मानम् ।
आयन्ननाम यं तं ननामयन्तं सदामानम् ।। 21 ।। समुद्गयमकम्

सोऽक्षत ऐक्षि स्त्रीभिर्नवनीतार्जुनमहाभयाऽगोप्यः ।
दृष्ट्वा चासंस्तस्मिन्नवनीतार्जुनमहाभया गोप्यः ।। 22 ।। द्वि. च. पा. य

माता वीक्ष्य हतौ द्रुमसानू तनयानुरोधसश्च्युत्या ।
स्तनलक्ष्म्याऽऽगातत्तटिनी सा नूतनया नु रोधसश्च्युत्य ।। 23 ।। द्वि. च. पा. य

सा त्वरिताऽभ्येत्य तु गिरिमुक्तवती नाहतो नूनम् ।
लोकस्यादित्यथ तं मुक्तवती नाहतो नूनम् ।। 24 ।। द्वि. च. पा. य

मातुः प्रियं न चक्रे स किं किणी कोमलो विदामा सहसः ।
क्रीडन् पीडां प्राक्च न सकिङ्किणीकोऽमलो विदामास ह सः ।। 25 ।। द्वि. च. पा. य

आयस्तं न सहार्जुनमनसोभयमस्यता तेन ।
तमिमं कथमालिङ्गति मनसो भयमस्य तातेन ।। 26 ।। द्वि. च. पा. य

चौर्यक्रियास्तव सखीन् सरमते स्मेरयन्तीह ।
इत्यालिङ्गन्ती तं सा रमते स्मेरयन्ती ह ।। 27 ।। द्वि. च. पा. य

जगदस्या लब्धनरव्याघ्राया मोदमाननगम् ।
समनाथत हृष्यन्त्या व्याघ्रायामोदमाननगम् ।। 28 ।। द्वि. च. पा. य

उद्गृह्य स्वजमाना स्वजमानासं नतापाङ्गी ।
जिघ्रन्त्यभवत्सोच्चस्वजमाना सन्नतापाङ्गी ।। 29 ।। द्वि. च. पा. य

विषयस्य मुनिगणणोऽंहोबलक्षयादाप यं त्यागात् ।
तत्स्मितरूचा मुखं शं बलक्षया दापयन्त्यागात् ।। 30 ।। द्वि. च. पा. य

यस्य पिशाची स्पृष्टावार्ताऽमृत साऽरमाश्वसती ।
मुमुदे सा तस्यास्फुटवार्तामृतसारमाश्वसती ।। 31 ।। द्वि. च. पा. य

तेनाथ वाससा मुखमावृत्याऽभाव्यत यशोदा ।
येन सुतेन तया चिरमावृत्या भाऽव्यत यशोदा ।। 32 ।। द्वि. च. पा. य

कीडावृतविवृतमुखं स्तम्भापरभागगं सहसा ।
अस्वजताकृत तस्यास्तं भा परभागगं सहसा ।। 33 ।। द्वि. च. पा. य

चरितैर्जगदशिवक्षयशालिभिरध्वान्तमस्तारि ।
दधता फलकयाय तु शालिभिरध्वाऽऽन्तमस्तारि ।। 34 ।। द्वि. च. पा. य

यान्युचितान्यकीणात् फलानि वै तानि केषुचित्तान्तः ।
यः कर्मसु दददास्ते फलानि वैतानिकेषु चित्तान्तः ।। 35 ।। द्वि. च. पा. य

स फलैर्विकायिकया समार्चि रमितस्सुहृद्यमितः ।
तत्पात्रं रत्नौघोऽसमार्चिरमितस्सुहृद्यमितः ।। 36 ।। द्वि. च. पा. य

फलमन्याकृत ददती सभाजनं भूरि चन्द्रेण ।
सममुख ऐदिध्दस्यास्स भाजनं भूरिचन्द्रेण ।। 37 ।। द्वि. च. पा. य

अगृहीत्वान्यां ददतीं समुन्मनागमितभावरताम् ।
मोक्षमनैषीत्साऽऽप तु समुन्मना गमितभा वरताम् ।। **38** ।। द्वि. च. पा. य

क्रीडन् स दिग्धतर्णककरीषदूरीकृतप्रभावस्थः ।
अवधीद्दैत्यान् केशवकरीषदूरीकृतप्रभावस्थः ।। **39** ।। द्वि. च. पा. य

कर्तुमृभून्यस्माब्धिं धीरो मन्धत्यजस्सुखेदान्तान् ।
सोऽकृत गाः कण्डूयनधी रोमन्धत्यजस्सुखे दान्तान् ।। **40** ।। द्वि. च. पा. य

सहितौ क्रीडन्तौ नोपरमन्तौ हरिबलौ कान्तौ ।
प्रीतिं न गतौ द्विषतां परमन्तौ हरिबलौ कां तौ ।। **41** ।। द्वि. च. पा. य

अपि दुरवधरौ योगेऽवकाष्टाङ्गोपयोगेन ।
वत्सान् गृहीतपुच्छावकाष्टां गोपयोगेन ।। **42** ।। द्वि. च. पा. य

घ्नन्तावितरान्यन्तावत्राप्तान्नामयमयन्तौ ।
वत्सान् जगतः पालावत्राप्तान्नाम यमयन्तौ ।। **43** ।। द्वि. च. पा. य

पपतुस्तौ गाश्शनकैरूषितश्वसदर्भकाननेषु ह सन्तौ ।
क्रीडाक्रमजपराजयरूषितश्वसदर्भकाननेषु हसन्तौ ।। **44** ।। द्वि. च. पा. य

गायन्तौ शमयन्तौ कोरकमहितान्तकरचरणौ ।
गा यन्तौ शमयन्तौ कोरकमहितान्तकरचरणौ ।। **45** ।। द्वि. च. पा. य

गानेषु सुदूरतरं विश्वावसुमत्यभूतां तौ ।
आशास्त नित्यशस्तौ विश्वा वसुमत्यभूतान्तौ ।। **46** ।। द्वि. च. पा. य

गातृकुलं सदृगमत न कुस्तुम्बुरुनारदाद्याभ्याम् ।
मेरुहिमाभ्यां हि तुलां कुस्तुम्बुरु नारदाद्याभ्याम् ।। **47** ।। द्वि. च. पा. य

गीतं श्रुत्वा मुमुचे हाहाहूहूर्वशीकृतस्थलया ।
गन्धर्वपारिषदाऽन्वितहाहाहूहूर्वशीकृतस्थलया ।। **48** ।। द्वि. च. पा. य

अधरीकृतवाचस्पतिसरस्वतीवरमयन्तौ गाः ।
विपिनेषु तृणैरूदकैस्सरस्वतीव रमयन्तौ गाः ।। **49** ।। द्वि. च. पा. य

बभतुस्तनुश्रिया कृतकान्ताननया सचन्द्रकान्ताननया ।
देवान् ययाऽभिपपतुः कान्ताननय सचन्द्रकान्ता न न या ।। **50** ।। द्वि. च. पा. य

नर्मभिरिद्धावासुरनृपारिजातावमानवैरपरैः ।
बालौ बालानुचितैर्नृपारिजातवमानवैरपरैः ।। **51** ।। द्वि. च. पा. य

नामग्राहं सुरभिभिरच्युतरामौ हवर्धमानाभिः ।
मुदितावेवं चेरतुरच्युतरामौ ह वर्धमानाभिः ।। **52** ।। द्वि. च. पा. य

आपालयतामनयोऽस्तो योऽपेतदवकोमलोऽगविभागः ।
आपालयतामनयोस्तोयोपेतदवकोऽमलो गवि भागः ।। **53** ।। समुद्गयमकम्

।। इति श्रीमत्कूरत्ताल्वान् प्रणीत यमकरनाकरे षष्ठाश्वासः ।।

श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरः

अथ सप्तमाश्वास ः

अथ कृष्णो व्रजसहितो बृन्दावनमाविवत्सदादरतः ।
असुरवधेन च तद्गोबृन्दावनमाविवत्सदा दरतः ।। **1** ।। द्वि. च. पा. य

प्रययौ तन्वन्विभवं स दिक्षु शाकटमहानि भृतम् ।
आस्थाय वर्त्म परितस्सदिक्षुशाकटमहानिभृतम् ।। **2** ।। द्वि. च. पा. य

प्रययौ तन्वन्विभवं स दिक्षु शाकटमहानि भृतम् |
आस्थाय वर्त्म परितस्सदिक्षुशाकटमहानिभृतम् || 2 || द्वि. च. पा. य

बृन्दावनमापदसावियत्तया विधुरितस्समित्रोऽन्तः |
द्विषतां यत्रागैरितवियत्तया विधुरितस्समित्रोऽन्तः || 3 || द्वि. च. पा. य

यत्र श्रोत्रस्य सुखं कीचकरासादितादित्यम् |
स्मरयति यच्च हनुमतः कीचकरासादित्यम् || 4 || द्वि. च. पा. य

यत्राश्वसन्ति सततभ्रमरागाः केसरप्रकाण्डेषु |
कवयस्तन्वन्तश्च भ्रमरा गाः केसरप्रकाण्डेषु || 5 || द्वि. च. पा. य

यदुपाश्रित्य सुपुष्पिततमालसालं बतेद्धाशम् |
मधुपालिर्मधुनोन्मदतमाऽलसाऽऽलम्बतेऽद्धा शम् || 6 || द्वि. च. पा. य

यत्र प्रियाभिरत्यभिरामाभिस्सिद्धचरणास्सुखगाः |
सङ्क्रीडन्तेऽपि सदा रामाभिस्सिद्धचरणास्सुखगाः || 7 || द्वि. च. पा. य

सक्तेषु यत्र सुरूचावृक्षेषु विलक्षणेषु खचितेषु |
न सपुष्पापुष्पभिदा वृक्षेषु विलक्षणेषु खचितेषु || 8 || द्वि. च. पा. य

विषया यत्र च तारास्सराजहंसावली मुखरतानाम् |
भाति च यत्सरसां श्रीस्सराजहंसावलीमुखरतानाम् || 9 || द्वि. च. पा. य

यत्र फलिताढ्यकदलीरसालपनसमुदितास्सदाप्लवगाः |
सस्त्रीकास्सुखिनश्च सरसालपनसमुदिताास्सदाप्लवगाः || 10 || द्वि. च. पा. य

यत्र द्रुमेषु पुष्पं सुमेघपुष्पप्रतीकाशम् |
कपिकुलमगगतजलधरसुमेघपुष्पप्रतीकाशम् || 11 || द्वि. च. पा. य

यत्र चरन्त्यगमूलैर्हरिणा धिक्ष्ण्यैस्सदृक्षरूपाश्च |
अलिनोग्रैः कुसुमरजोहरिणाः धिक्ष्ण्यैस्सदृक्षरूपाश्च || 12 || द्वि. च. पा. य

अथ देशे बहुशष्पे ससर्वतोमुखरसारसके |
समवासयत्तु घोषं स सर्वतोमुखरसारसके || 13 || द्वि. च. पा. य

वसता तत्र त्ववता सुरभीराराध्यमानेन |
निहता समूलघातं सुरभीराराध्यमानेन || 14 || द्वि. च. पा. य

अथ शिशिरस्याभ्युदिते वसन्तमासेऽवमानेन |
मुमुदे जनेन हरिमिह वसन्तमासेवमानेन || 15 || द्वि. च. पा. य

धनदासाभिमुखोऽर्कश्शमनाशातोदरीत्ववश्यायात् |
कान्ताकान्तं सोद्धतिशमना शातोदरी त्ववश्याऽयत् || 16 || द्वि. च. पा. य

यद्धिमदुर्गं सुगमं पानीयं तदद्विजोत्तमै रमितैः |
अजनि कुमाराश्च तदोपानीयन्त द्विजोत्तमैरमितैः || 17 || द्वि. च. पा. य

आदधताग्नीन्विप्रास्स्वामन्त्रब्राह्मणैरनुज्ञाताः |
बुद्ध्वा कियावितीर्णस्स्वामन्त्रब्राह्मणैरनुज्ञाताः || 18 || द्वि. च. पा. य

पुण्यततिरैदिवेज्यास्तन्वानानां शुभा सितया |
कुरवकसुमनोमय्या तन्वा नानांशुभासितया || 19 || द्वि. च. पा. य

हारं मेचकमणिवद्विशदकुरवकं विभापयामास |
भृङ्गकुलं पान्थान् यद्विशदकुरकं विभापयामास || 20 || द्वि. च. पा. य

मलयाख्यं स्वप्रभवं पवमानोऽगमितदक्षिणाशं सः |
प्रववौ योऽनङ्गसुहृत्पवमानो गमितदक्षिणाशंसः || 21 || द्वि. च. पा. य

सङ्क्रीडति परपुष्णे सहकारमचर्चिकासु रते |
मानमवधीर्य पत्या सह काऽरमचर्चिका सुरते || 22 || द्वि. च. पा. य

कुसुमैर्मधौ समृद्धिदमुच्चं चूतं तु वरमासे ।
आसाद्य परभृतोऽङ्कुरमुच्चञ्चूतं तुवरमासे ।। 23 ।। द्वि. च. पा. य

पुष्यन् पर्णस्तुलितः कृशानुना नाम धूपरीतिमती ।
पङ्क्तिरलीनां किल यमकृशाऽनु नानामधूपरीतिमती ।। 24 ।। द्वि. च. पा. य

प्रवितत्य गौरकिरणानुच्चलसच्चम्पकान्तिकया ।
भातमटव्याऽनुकृतानुच्चलसच्चम्पकान्तिकया ।। 25 ।। द्वि. च. पा. य

को विरहिणीस्सुकेसरकेसरलालिततया न वामा द्यन् ।
देशोऽथ च व्रतत्या के सरलालिततया न वाऽमाद्यन् ।। 26 ।। द्वि. च. पा. य

अलिनि मलिनं प्रसूनं मधुद्रुमाणां वितन्वति क्रमतः ।
कोऽस्थात् सृजति च कुसुमे मधु द्रुमाणां वितन्वतिक्रमतः ।। 27 ।। द्वि. च पा. य

अनिलस्सुरभिः कमुकैश्शतपत्रपरागतः श्रिताम्रतया ।
वनमपुषज्ज्वलितं नवशतपत्रपरागतश्रि ताम्रतया ।। 28 ।। द्वि. च. पा. य

अलिनो न मेदुरस्मिन् काले यकया महावना वल्ल्या ।
का सा समिता पुष्यत्कालेयकया महावनावल्ल्या ।। 29 ।। द्वि. च. पा. य

अमहन्मधूनि यत्यलमलया लताऽलितारूण्यम् ।
मदत इवेत्य किसलयैर्मलयानिलतलिताऽऽरूण्यम् ।। 30 ।। द्वि. च. पा. य

वल्लीभिस्तरवोऽलिभिरञ्जनवल्लीयमानाभिः ।
स्त्रीभिर्वराश्च बभुरितरञ्जनवल्लीयमानाभिः ।। 31 ।। द्वि. च. पा. य

दौत्याच्छोकाब्धिजुषां कुसुमहतानां तरी यका साऽरम् ।
मधुना भृङ्ग्यकृत प्रतिकु सुमहता नान्तरीयकासारम् ।। 32 ।। द्वि. च. पा. य

सरसि परिचित्य सोत्पलपूगोत्कलिकाभिरम्भसामोदम् ।
चक्रेऽनिलो मृदुर्वान् पूगोत्कलिकाभिरम्भसामोदम् ।। 33 ।। द्वि. च. पा. य

यो धैर्यात् स्त्रीं व्यरहीत्स स्मारशिलीमुखैरूचितैः ।
विद्धः पुष्पैरेनां सस्मार शिलीमुखै रूचितैः ।। 34 ।। द्वि. च. पा. य

नार्या ह्यभिसृतमवमतरवि कल्कण्ठीरवैर्यथा मार्गम् ।
धैर्यं हि मुषितमुच्चैरविकलकण्ठीरवैर्यथा मार्गम् ।। 35 ।। द्वि. च. पा. य

ऋद्धा मुदिता यदद्धि फल्गुन्युद्धवमुदाकृषत ।
तरूणेतरूणं धैर्ये फल्गुन्युद्धवमुदाकृषत ।। 36 ।। द्वि. च. पा. य

अटवी स्म प्रसवजुषा तिलकेन चकास्ति माधवीतेन ।
ऋद्धिर्न स्म बहुमता तिलकेन च काऽस्ति माधवी तेन ।। 37 ।। द्वि. च. पा. य

महति जनमुत्सवमृतुस्मारं स्मारम्भयन्नित्यम् ।
पान्थश्चागाद्युवतेस्मारं स्मारं भयं नित्यम् ।। 38 ।। द्वि. च. पा. य

सममत हरिं निजर्ध्या गोचरितमनुव्रजन्तं तम् ।
भावं दधन्मर्धुनगोचरितमनुव्रजं तं तम् ।। 39 ।। द्वि. च. पा. य

यं भजतां हि जनानां सवनानि सदक्षिणानि लक्ष्माणि ।
गाः पातुं सखिभिरगात् स वनानि सदक्षिणानिलक्ष्माणि ।। 40 ।। द्वि. च. पा. य

आवीदगाः प्रीतिं मधुदिवसेषु रसौघनायितां गमितः ।
पुष्पैर्मदनस्साक्षादिव सेषुरसौ घनायिताङ्गमितः ।। 41 ।। द्वि. च. पा. य

सुहृदां विपिने कृष्णोऽसौ रभसारादगात्सहैव कुलेन ।
अतुषच्च परादुद्भटसौरभसारादगात् स है वकुलेन ।। 42 ।। द्वि. च. पा. य

मुक्ताद्यविद्रुमायिषु कङ्केलिषु देववल्लभासत्या ।
तस्य वने चरतोऽकृत कं केलिषु देववल्लभा सत्या ।। 43 ।। द्वि. च. पा. य

यस्तृप्यति हविषि शुभे वौषट्पदभावितत्यागे ।
स्वविडम्बिन्न्यसजत् स सवौ षट्पादभावितत्याऽगे ।। 44 ।। द्वि. च. पा. य

देव्यब्जमुख्यलिकुलप्रियालकान्ता रमा यस्य ।
गाःपान् सैक्षत पुष्प्यत्प्रियालकान्तारमायस्य ।। 45 ।। द्वि. च. पा. य

यः प्राप्यो भक्तानां सत्राभि समालयानि लालयताम् ।
पत्कार्ष्यचरदितानि तु सत्राणि स मालयानिलालयताम् ।। 46 ।। द्वि. च. पा. य

सखिभिस्स एकशोऽमुं नन्वहमनवरतमञ्चयन्नासे ।
इति पौष्पमुपहृतं यन्नन्वहमनवरतमं चयं नासे ।। 47 ।। द्वि. च. पा. य

सखिभिरपेतैस्तस्यापल्लवतः कर्णिकारचिता ।
चूडाक्रीदासु कृता पल्लवतः कर्णिका रचिता ।। 48 ।। द्वि. च. पा. य

कुरवकगुच्छेनकृतो विशेषको माधवस्य सुमनोभिः ।
स स भूषणश्च नानाविशेषको माधवस्य सुमनोभिः ।। 49 ।। द्वि. च. पा. य

तेनैवमरामि वने शृङ्गारोचितसुरभ्यभीकेन ।
निजवक्षस्स्रगलङ्कृत शृङ्गारोचितसुरभ्यभीकेन ।। 50 ।। द्वि. च. पा. य

पायंपायं वनमभि गोमण्डलमाव सन् सबलभद्रः ।
पायंपायं वनमभि गोमण्डलमावसन् स बलभद्रः ।। 51 ।। समुद्गयमकम्

।। इति श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरे सप्तमाश्वास ः ।।

श्रीमत्कूरत्ताल्वाननुगृहीत यमकरत्नाकरः

अथ अष्टमाश्वासः

प्रियमारे काले किल रूषितेन ज्या निदाघकालेन ।
प्राप्तैक्ष्यमुना सह नृभिरूषितेन ज्यानिदाघकालेन ।। 1 ।। द्वि. च. पा. य

जनमदकरं परभृतैरमीमदन्नाम मधुरतनुम् ।
इति किल तपप्ता जहुरमी मदन्नाममधुरतनुम् ।। 2 ।। द्वि. च. पा. य

सरसीषु तु जञ्झानिलनमितानि सहस्रपत्राणि ।
अपुरिव तृषा वनरसानमितानि सहस्रपत्राणि ।। 3 ।। द्वि. च. पा. य

क्षयिणि जलेऽब्जमलिकृतत्रस्तरि पूष्णोऽपचित्यै हि ।
उदगादिव यदनेन त्रस्तरिपूष्णोपचित्यैहि ।। 4 ।। द्वि. च. पा. य

यद्धि पुराऽऽरादाश्रितशतपत्ररथैरपायि घनरसकम् ।
तत्त्ववतीर्य निपीतं शतपत्ररथैरपायि घनरसकम् ।। 5 ।। द्वि. च. पा. य

बककुलमुपास्त परिसरमार्ताण्डजधाम तोयेषु ।
शैत्यमधस्थं त्रसदिव मार्ताण्डजधामतो येषु ।। 6 ।। द्वि. च. पा. य

महिषाणां धावत् कुलमभ्यर्णो दीर्यमाणता लूनाम् ।
अकृत शफरीं तटानामभ्यर्णोदीर्यमाणतालूनाम् ।। 7 ।। द्वि. च. पा. य

छायातमश्शरणगं पादपराजय उदाकारि ।
न्यस्यान्यतोऽपुरत इनपादपराजय उदाकारि ।। 8 ।। द्वि. च. पा. य

पान्थो मनोरथाश्रयसुखरसमुदितोऽस्रयुक् तेन ।
अतिकर्शितस्तु रविण सुखरसमुदितोस्रयुक्तेन ।। 9 ।। द्वि. च. पा. य

यः पान्थेऽब्दमिवदिनं क्षेपीयो मातरि श्वासः ।
तेन मितो गुरूरूष्मोत्क्षेपी यो मातरिश्वा सः ।। 10 ।। द्वि. च. पा. य

ऊष्माण्यहते सन्ध्यासनीडतरूणातपस्यापि ।
नोष्म कथमपि विहगैस्सनीडतरूणा तपस्याऽऽपि ।। 11 ।। द्वि. च. पा. य

मुदमधित दृष्टमम्भो न्यग्रोधस्यध्वनीनेषु ।
छायाप्यवतो वयसां न्यग्रोधस्य ध्वनीनेषु ।। 12 ।। द्वि. च. पा. य

पान्थो निधिमिव नद्या उत्सेऽधाद्वारि तोषेण ।
वृक्षेण रक्षितश्च स उत्सेधाद्वारितोषेण ।। 13 ।। द्वि. च. पा. य

तृषि गाढा मुमुचे कृशतरोरूदघ्नन्न वाप्यतुच्छायाम् ।
पान्थैर्ये किल तापं तरोरूदघ्नन्नवाप्य तुच्छायाम् ।। 14 ।। द्वि. च. पा. य

असरदलिन्यगतिरनिर्भरा शिरीषद्रुमान्यस्ता ।
जलवदभाद्रविरूग्जितभराशिरीषद्रुमान्यस्ता ।। 15 ।। द्वि. च. पा. य

श्रेष्ठां जङ्घापवनादपवनतां तापगं कालम् ।
प्रेक्ष्य प्रजा न बोधेदपवनतान्तापगं काऽलम् ।। 16 ।। द्वि. च. पा. य

व्यदधत पान्थाशाभिस्सहायतास्तपदिना वितततापाः ।
तत्स्त्रीस्सुकृशाः प्राप्तासहायतास्तपदिना वितततापाः ।। 17 ।। द्वि. च. पा. य

क्वथितं पाथो रविणाऽवटेषु गव्याभृता लसता ।
पीत्वाऽरोमन्थायत वटेषु गव्या भृतालसता ।। 18 ।। द्वि. च. पा. य

सुखिनश्च यन्त्रलक्ष्मीं प्रभेजिरे तानितासारम् ।
अजनि सुखदा जितार्कप्रभेऽजिरे तानिता साऽरम् ।। 19 ।। द्वि. च. पा. य

सुख्यभजत जलमेलामालयसितरूचिजसौरभयम् ।
पान्थोऽह्नि निशि च विपदामालयसितरूचिसौरभयम् ।। 20 ।। द्वि. च. पा. य

स्नातानुलिप्तमनुगतमालिकया समुन्मिषत्याऽगात् ।
स्त्रैणं कामपि कान्तिं नवमालिकया समुन्मिषत्यागात् ।। 21 ।। द्वि. च. पा. य

ऋद्धा स्म सुगन्धिं श्रितपाटलमाशुगमयन्ति सह सायम् ।
कालं पान्थास्सन्ध्यापाटलमाशु गमयन्ति सहसा यम् ।। 22 ।। द्वि. च. पा. य

भ्रष्टो भुवस्ससुरभिरजनीष्वासादितस्मरो हीनः ।
स भवति सायजमल्ल्या रजनीष्वासादितः स्म रोहीनः ।। 23 ।। द्वि. च. पा. य

कृशया कृशा निशा सह सदुत्सवत्या जिताशुभया ।
आवीन्नद्या जडिमजसदुत्सवत्याजिताशुभया ।। 24 ।। द्वि. च. पा. य

जगदियमुभय्यपि कृशा विनोपकारादपादिताशङ्कम् ।
वसुमांस्तु जीवनमसाविनोऽपकारादपादिताशङ्कम् ।। 25 ।। द्वि. च. पा. य

सुखदास्तदाऽनिलोत्पलपानीयोषेन्दुमुख्यास्ते ।
याऽल्पाकल्पा स च सुखपानी योषेन्दुमुख्यास्ते ।। 26 ।। द्वि. च. पा. य

हरिणा प्रभावजितरविरूचिराशिशिरोपचारेण ।
गोत्रा कृता निरीतिरेवं रूचिरा शिशिरोपचारेण ।। 27 ।। द्वि. च. पा. य

बृन्दावनं गवां बहुदूर्वाम्भः गायदलितितान्तिककम् ।
स्वामी लक्ष्म्यामकृत सदूर्वा भोगाय दलिततान्तिककम् ।। 28 ।। द्वि. च. पा. य

देवेभ्योऽब्धेर्जितरिपुसमरो मन्धाय तस्थे यः ।
तेन सुखमवाप्य गव्या सरोमन्धायत स्थेयः ।। 29 ।। द्वि. च. पा. य

इह यस्यन्ति हि यस्यारं स्तवने शाखिानस्स्वशाखाभिः ।
प्रच्छायन् ग्च्छन् सोऽरंस्त वने शाखिनस्स्वशाखाभिः ।। 30 ।। द्वि. च. पा. य

अथ जगति बहुलवितत्त्व्याधौ तेनाभिया तानि |
मनसा गवां कुलानि व्याधौतेनाभियातानि || 31 || द्वि. च. पा. य

कैलासादवदत्तं गत्वा माहेश्वरः कोऽपि |
त्वदरिषु दधन्मनस्सोऽङ्ग त्वामाहेश्वरः कोपि || 32 || द्वि. च. पा. य

कलिरिति किलात्र जातो विरोचनस्यासुरस्तनयः |
दैत्यकुलस्य रूचा जितविरोचनस्यासुरस्तनयः || 33 || द्वि. च. पा. य

अजनि वने भुव्यमुना मन्मथतरूणाऽयमानेन |
छेत्तव्यो यो भवता मन्मथतरूणायमानेन || 34 || द्वि. च. पा. य

तं जातमटव्यां यमसहजाया दक्षिणाऽहीनम् |
वृणुते लतास्तु भूत्वा सह जाया दक्षिणा हीनम् || 35 || द्वि. च. पा. य

फलितेऽत्रजनो भक्तेऽमितरोगो वत्सल क्षणतः |
अनुयात्यसुरगणश्च तमितरो गोवत्सलक्षणतः || 36 || द्वि. च. पा. य

स तु तव सह गोवत्सैर्हन्तव्यो मन्यमानस्य |
यस्य किलेहोच्छ्रायो हन्त व्योमन्यमानस्य || 37 || द्वि. च. पा. य

प्रमथेनैवमकथत् प्रमथनतस्सन्महादेवः |
हरिरप्यरिरंसत तत्प्रमथनतस्सन्महा देवः || 38 || द्वि. च. पा. य

स वनं ययौ सवल्लवचमूरवो यन्निवेशस्य |
वचनं हरिर्न शक्ता चमूरवो यन्निवेशस्य || 39 || द्वि. च. पा. य

दूरात्स तं कपित्थं योजनमात्रायतस्कन्धम् |
ऐक्षत बिभ्रद्विपुलं यो जनमात्रायत स्कन्धम् || 40 || द्वि. च. पा. य

वीक्ष्याभितोऽसुरगणं दृश्यं तरूरूपमानेन ।
गोपास्सप्लुति यान्तोऽदृश्यन्त रूरूपमानेन ।। 41 ।। द्वि. च. पा. य

तं कपटगोगणोऽऽगात्कोपचितो वाहवत्समयी ।
अपि परिषत्तत्र भयं कोपचितोवाह वत्समयी ।। 42 ।। द्वि. च. पा. य

अनिहन्तुं तेष्वासुरभावात्सकमप्ययं तदा नैषीत् ।
तस्य क्षिपन् फलेषूद्भावात्सकमप्ययं तदाऽनैषीत् ।। 43 ।। द्वि. च. पा. य

कृष्णगृहीतश्रोणिफलकानि ग्राहितरूजानि ।
वत्सकुलान्यपतन् यैः फलकानि ग्राहितरूजानि ।। 44 ।। द्वि. च. पा. य

वत्सफलान्यास्थदसावन्योन्यस्यैवमर्दनतः ।
जन्तुः पलायत शिशून्वन्यो न्यस्यैव मर्दनतः ।। 45 ।। द्वि. च. पा. य

ददृशुर्गोपा विटपं निभञ्जयन्तं विनादयं तं तम् ।
वत्सगणं क्षिप्त्वांहोनिभं जयन्तं विनादयन्तं तम् ।। 46 ।। द्वि. च. पा. य

लीलां स निहतजगदघकल्पद्रुमवत्सगोत्राणाम् ।
हरिराश्रयन्मुदमधात् कल्पद्रुमवत् सगोत्राणाम् ।। 47 ।। द्वि. च. पा. य

तत्र वनेऽस्तसमस्तस्तम्बेऽरमतोद्यतोऽगहनम् ।
इन्द्रमति प्रति चासौ स्तम्बेरमतो द्यतो गहनम् ।। 48 ।। द्वि. च. पा. य

या कृतगोतरूजीवितमोषाऽमा सत्वशेषेण ।
अटवीं स वह्निन तामोषामास त्वशेषेण ।। 49 ।। द्वि. च. पा. य

सांवर्त इवाधाक्षीत्तदाश्रयाशोऽभितो द्योगे ।
धूमे ध्वजे निजेऽर्चिस्तदाश्रया शोभितोद्योगे ।। 50 ।। द्वि. च. पा. य

स्पृष्ट्या दुष्टतरोः किल वियतो दोषाकरस्य दहनेन ।
मुदजनि कृष्णाख्यस्यावियतो दोषाकरस्य दहनेन ।। 51 ।। द्वि. च. पा. य

सङ्कल्पात्तस्याभ्रं वृद्धिमदधिकान्तिकासारम् ।
अजनि वनं त्वकृतासावृद्धिमदधिकान्तिकासारम् ।। 52 ।। द्वि. च. पा. य

हरिणा सहाथ गोपा निववृतिरे तेन सहितेन ।
यः किल धर्मस्य महानिव वृतिरेतेन सहितेन ।। 53 ।। द्वि. च. पा. य

अथ सन्ततौ हतायां वैरोचन्याममीतरङ्गिण्याम् ।
सस्नुस्साकं हरिणा वैरोचन्याममी तरङ्गिण्याम् ।। 54 ।। द्वि. च. पा. य

बृन्दावनं व्रजचमूः समाययौ वनमनायासा ।
शार्दूलसिंहगोवृषसमाययौवनमना या सा ।। 55 ।। द्वि. च. पा. य

इति लोकमरीणां सोऽमुमुदेजयतामयाद्विषताम् ।
तेन च तेषां तेषां मुमुदे जयताऽमयात् द्विषताम् ।। 56 ।। द्वि. च. पा. य

आयिसुखे लाभवता बलिना हरिणाऽसमानेन ।
आयि सुखेला भवता बलिना हरिणा समाऽनेन ।। 57 ।। समुद्गयमकम्

इति श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरे अष्टमाश्वासः ।।

श्रीमत्कूरत्ताल्वान् अनुगृहीत यमकरत्नाकरः

अथ नवमाश्वासः

अथ स निजानुध्यानप्रशमितरविपाटवत्वेन ।
गोमण्डलमकृत वने प्रशमितरविपाटवत्वेन ।। 1 ।। द्वि. च. पा. य

औष्ण्यं स नियच्छन्खरमपश्श्यदाश्वस्यमानमित्रोस्रः ।
गच्छन्यमुनाया ह्रदमपश्यदाश्वस्यमानमित्रोस्रः ।। 2 ।। द्वि. च. पा. य

परितो द्रुमान्विमर्दितकलिकालि यदम्भसा कोशे ।
वायुरदहद्वनेऽन्वितकलिकालियदम्भसाकोशे ।। 3 ।। द्वि. च. पा. य

स म्रदितुं कालियकाहिं सन्तमसच्छिदायुक्तः ।
ऐच्छदरिमर्दने नृन् हिंसन्तमसच्छिदायुक्तः ।। 4 ।। द्वि. च. पा. य

दूर्वा गावोऽत्र मय मन्येऽद्युः कामपालेन ।
इति स विनाऽगात्तमसितुमन्येद्युः कामपालेन ।। 5 ।। द्वि. च. पा. य

पश्यंश्च तद्वनं हतमनुपदवि हितो दयामुदार तया ।
विततान वने लक्ष्मीमनुपदविहितोदयामुदारतया ।। 6 ।। द्वि. च. पा. य

तत्क्षणमजनीह गवामविपल्लवता सदेशेन ।
नाभूत्कस्यापि तरोरविपल्लवता सदेशे न ।। 7 ।। द्वि. च. पा. य

दृष्ट्वा ह्रदे स मेने विषहतभुवनं महाहीनः ।
आवस्तुं मा स्मेदं विषहत भुवनं महाहीनः ।। 8 ।। द्वि. च. पा. य

तटागस्य सोऽन्तिकमगात् कदम्बकस्यारूरुक्षणतः ।
विषवृषतो यच्छाखाकदम्बकस्यऽऽरूरुत्क्षणतः ।। 9 ।। द्वि. च. पा. य

तत्राङ्घ्रिमधाद्येन तु विभूषितोऽनेकधाऽऽम्नायः ।
व्यकंस्त स जगत् साल्पकविभूषितोऽनेकधाम्ना यः ।। 10 ।। द्वि. च. पा. य

स सपदि विपदां तरूरितसम्पल्लवितोद्यदुस्रोऽतः ।
जातो जयन् गररूजां सम्पल्लवितोऽद्य दुस्रोतः ।। 11 ।। द्वि. च. पा. य

न्यस्ते द्रुः कान्नु दशां हन्ताप रमाधिनाथपदयुग्मे ।
यस्मृत एनस्सार्धं हन्ता परमाधिनाऽथ पदयुक् मे ।। 12 ।। द्वि. च. पा. य

क्षणमुकुलितशाखितया सकण्टकभुजङ्गजायमानतमः ।
हृष्टमतनिष्ट विजहौ स कण्टकभुजङ्गजायमानतमः ।। 13 ।। द्वि. च. पा. य

तस्याध्यरूक्षदुदितच्छन्दश्शाखां तदैव तया ।
श्रुतिवत् भातमुदूढच्छन्दश्शाखान्तदैवतया ।। 14 ।। द्वि. च. पा. य

शाखां हरिणा स श्रमहृदयेन समानतामवापदितः ।
तरूतल्लजोऽथ विदुषां हृदयेन समानतामवापदितः ।। 15 ।। द्वि. च. पा. य

तं दधतोऽस्य सुलोचनकमलं धाराधरं सदृशम् ।
बिभ्रत्तटमसितं धृतकमलं धाराधरं सदृशम् ।। 16 ।। द्वि. च. पा. य

शिरसा वहंस्तदङ्घ्री परमपदं चायमानानाम् ।
सूरीणां स समोऽभूत् परमपदं चायमानानाम् ।। 17 ।। द्वि. च. पा. य

सोऽत्र बभौ स्व इव वसन्न्यग्रोधेऽयोऽन्तकालेयः ।
जगतोऽस्य प्रततेऽभ्युन्यग्रोधेयोऽन्तकालेऽयः ।। 18 ।। द्वि. च. पा. य

तत्रस्थ एव हृष्यन्नुन्नतमास्फोटयाञ्चक्रे ।
शब्देन तेन स दिवं नुन्नतमा स्फोटयाञ्चक्रे ।। 19 ।। द्वि. च. पा. य

न्यपतदध्रदेऽथ विनदन् सरोरूहाक्षो भयत्यक्तः ।
तं स्म विषेणाहिभ्यस्स रोरूहा क्षोभयत्यक्तः ।। 20 ।। द्वि. च. पा. य

रूषितोत्थितं तु तस्मिन् पञ्चाननमहिमशेषभोगभुजम् ।
ऐक्षत धाम परं जितपञ्चाननमहिम शेषभोगभुजम् ।। 21 ।। द्वि. च. पा. य

निजसौन्दर्यवशीकृतसमस्तकन्यस्तमस्तारि ।
चक्रे चरणाब्जमहेस्स मस्तकन्यस्तमस्तारि ।। 22 ।। द्वि. च. पा. य

तेनाकारि फणे श्रितखे लास्यमहत्यभीतेन ।
भियमहिना न विषेहेखेलाऽस्य महत्यभीतेन ।। **23** ।। द्वि. च. पा. य

शरणमहिः फणया विमुदयमानतया ससर्पेशम् ।
अधित च सद्यः कृष्णो दयमानतया स सर्पे शम् ।। **24** ।। द्वि. च. पा. य

तमहिं तार्क्ष्य स्वपदा समुद्रमावासमाशयितुम् ।
अपि तं दिदेश कृष्णस्समुद्रमावासमाशयितुम् ।। **25** ।। द्वि. च. पा. य

श्रुत्वा व्रजप्रजैवं प्रभयेहा क्षिप्रमेयाय ।
दृष्ट्वास्मै स्वस्त्यकृत प्रभयेहाक्षिप्रमेयाय ।। **26** ।। द्वि. च. पा. य

शुचमहृत स व्रजस्य सवर्षीयोबालयोषस्य ।
दमनादहेश्च भुवि सुखवर्षी योऽबालयोषस्य ।। **27** ।। द्वि. च. पा. य

भियमजहुरशङ्किषत च नन्दमुखा नाम गोपा याम् ।
तस्योच्चार्याधुस्सानन्दमुखा नाम गोपायाम् ।। **28** ।। द्वि. च. पा. य

इत्थमहिं मृदितवता यमुना समभावि तेनेह ।
समितेन च घोषो वायमुनाऽसमभा वितेनेह ।। **29** ।। द्वि. च. पा. य

सखिभिर्मदनस्साक्षाद्विजहार वसन्निवर्तीयः ।
हरिरसुरभयोद्विग्नद्विजहारवसन्निवर्ती यः ।। **30** ।। द्वि. च. पा. य

अथ तपतप्ते भुवनेऽरमयन्ननुकम्पयोदपो घनसमयः ।
प्रादुरभूज्जनमृद्धं रमयन्ननुकम्पयोदपो घनसमयः ।। **31** ।। द्वि. च. पा. य

तमुपानृत्यत्केकी जलदानकरवरसारतो यदकम् ।
जगतस्तच्छमयन्तं जलदानकरवरसारतोयदकम् ।। **32** ।। द्वि. च. पा. य

दृष्टाभ्रैर्हंसैरभि पलायितं मानसं द्रुतं साकम् ।
स्मरवह्निनाऽध्वगतस्योपलायितं मानसं द्रुतं साकम् ।। **33** ।। द्वि. च. पा. य

विरहिष्वशमधित प्रभुरध्यायोऽपाकृतिरूपाध्यायैः ।
आक्रियत सहाध्येतृभिरध्यायोपाकृतिरूपाध्यायैः ।। 34 ।। द्वि. च. पा. य

तृप्यन्दृष्ट्यैव सुखं नयमानतया पयोमुचन्नीरम् ।
प्रीत्यैव चातकोऽन्वितनयमानतयाऽऽप योऽमुचन्नीरम् ।। 35 ।। द्वि. च. पा. य

क्षितिसौरभमनिलोऽवहदारम्भासारसेकेन ।
आस्थायि सार्धममहितदारम्भासा रसे केन ।। 36 ।। द्वि. च. पा. य

सहवर्षतां घनानां कुम्भी रवपुष्टयाऽऽश्वसन्वशया ।
विजयी जघ्रौ सिक्तां कुम्भीरवपुष्टया श्वसन्वशया ।। 37 ।। द्वि. च. पा. य

प्रेयसि चिरदृष्टेऽब्दे नूनं बाष्पायते स्म धात्रीह ।
तस्य च वेगं धारा नूनं बाष्पायते स्म धात्री ह ।। 38 ।। द्वि. च. पा. य

उदजनि निरङ्कुशश्रीस्तदा च कर्षकमहस्स्वभावेन ।
योक्तुं किलौष्ण्यमाभ्रं तदाचकर्ष कमहस्स्वभावेन ।। 39 ।। द्वि. च. पा. य

शीतभियेव समकुचन्ककुभो वारिधरमस्तकं नभसि ।
ददृशुः प्राप्तो भृङ्गैः ककुभोऽवारि धरमस्तकं नभसि ।। 40 ।। द्वि. च. पा. य

सोष्मा सोच्छ्वसिताऽभूत् पङ्कवती जीवनान्तस्था ।
भूः कमतस्त्री विरहदपङ्कवती जीवनान्तस्था ।। 41 ।। द्वि. च. पा. य

वर्षपृषतो बभुर्घनखेलाजाश्चोदिता नवाशाभिः ।
क्षितिपुरमिव विशत ऋतोः खे लाजाश्चोदिता नवाशाभिः ।। 42 ।। द्वि . च . पा . य

विद्युद्धेम्नोऽभ्राशिर्निकषोपलभावमपसन्ना ।
बालातपस्य किल यन्निकषोपलभाऽवमा सन्ना ।। 43 ।। द्वि. च. पा. य

धारा सृताऽम्भसोऽभ्रैर्मुक्तादामोचिता स्वसिते ।
उपरि विततेऽम्बरे किल मुक्तादामोचिता स्वसिते ।। 44 ।। द्वि. च. पा. य

न ज्ञाता भूमेरधिरूढा वाऽच्युतपदं घना धारा ।
स्वमिताभुवो दिवो गुरूरूढाऽवाच्यत पदं घनाधारा ।। 45 ।। द्वि.च. पा. य

व्रण इव हरिधन्व तटित्कृपाणिखण्डितमवाप घनम् ।
तद्गर्जितान्यकृषताकृपाणिखण्डितमवापघनम् ।। 46 ।। द्वि. च. पा. य

शमिते वनेषु वह्नौ ननृते शिखिना वितत्य पक्षान्तौ ।
तेन तु पान्थहृदीष्टाननृते शिखिनाऽवितत्यपक्षान्तौ ।। 47 ।। द्वि. च. पा. य

अशबलयन् दिवि नियुतायुता बलाकाः पयोधरस्वङ्गम् ।
शीतभिया ययुरर्द्धा युताबलाकाः पयोधरस्वङ्गम् ।। 48 ।। द्वि. च. पा. य

पतिमति मोदयितारं दयितारं या च मानेन ।
वचसाऽगादयितारं दयितारं याचमानेन ।। 49 ।। काञ्चीयुक्तसमुद्गयमकम्

विकिरद्भिरपो रूक्षस्वरसैरिभसमजवर्धनीरयुतैः ।
तनुरापि घनैरजहत्स्वरसैरिभसमजवर्धनीरयुतैः ।। 50 ।। द्वि. च. पा. य

यस्त्रीं व्यरहीन्मनसिजपृषत्कजतेन स जडिम्ना ।
स्पृष्टो हतोऽनिलेन सपृषत्कजातेन सजडिम्ना ।। 51 ।। द्वि. च. पा. य

मानस्य मानिनीनां कलाऽपि नामेध्यमानेन ।
मानेन न नावमता कलापिनामेध्यमानेन ।। 52 ।। द्वि. च. पा. य

भृङ्गकुलाय विकस्वरमहानि केतकमरोचिष्ट ।
यत्संश्रिततद्दशपुटमहानिकेतकमरोचिष्ट ।। 53 ।। द्वि. च. पा. य

ववृषुर्मेघा महितसनवनीपकभूमयोऽगेषु ।
सदुदारा इव खिन्ना न वनीपकभूमयोगेषु ।। 54 ।। द्वि. च. पा. य

दवदहनस्य पयोदा वनकृतमालस्यमधुरसतः ।
उदजीवन् षट्चरणा वनकृतमालस्य मधुरसतः ।। **55** ।। द्वि. च. पा. य

अजनि वनस्य प्राप्ते दवशमने नव्यता नितराम् ।
पान्थवनं त्वथ तापादवशमनेन व्यतानितराम् ।। **56** ।। द्वि. च. पा. य

भृङ्गकुलेन प्रमुदितमधिकन्दलि तायमानेन ।
येन हि मालत्यनुवनमधिकं दलितायमानेन ।। **57** ।। द्वि. च. पा. य

सरितां बभे श्रियर्धौ सत्यामत्याविलापानाम् ।
भटिका विसस्मरूर्मुदि सत्या मत्या विलापानाम् ।। **58** ।। द्वि. च. पा. य

मूलं सरित्स्वयुरगास्स्वादूनितमस्ततीरसिताः ।
अनुचकुर्जम्बूनि स्वादूनि तमस्ततीरसिताः ।। **59** ।। द्वि. च. पा. य

जडिमभयदेन मरूता ववे जनानामशेषाणाम् ।
पान्थानां धी क्व धृताववेजना नामशेषाणाम् ।। **60** ।। द्वि. च. पा. य

प्रियजनसमितिर्युवतिभिरहन्यमानाभिरभ्यसारीत्या ।
रेमे स्वया स्मरशैरैरहन्यमानाऽभिरभ्य सा रीत्या ।। **61** ।। द्वि. च. पा. य

ऋतुरसहत रविविभवं न द्योगं भीरविभवदभ्रमयः ।
कूलङ्कषास्समवहन्नद्यो गंभीरविभवदभ्रमयः ।। **62** ।। द्वि. च. पा. य

अथ कृष्णस्तालवनं धैनुकमापालयन्नितान्तरतः ।
रमयन् सुहृदो विपदं धैनुकमापालयन्नितां तरतः ।। **63** ।। द्वि. च. पा. य

ददृशे च रूषा व्याघ्रस्सानुचरो हीव धेनुकस्सपदि ।
तेन गृहीत्वोक्षिप्तस्सानुचरो हीवधेऽनुकस्स पदि ।। **64** ।। द्वि. च. पा. य

असुरखरैः फलमुद्यन्मुत्तालानामपाचिनोदग्रात् ।
यद्वर्षान्न घनानामुत्तालानामपाचि नोदग्रात् ।। 65 ।। द्वि. च. पा. य

ते चासुराः फलानां निहता लवनेन तालीनाम् ।
तेषां मध्ये न्यपतन्निह तालवने नतालीनाम् ।। 66 ।। द्वि. च. पा. य

रेमे कृष्णेन श्रमरहितेन खरासुरं जयता ।
अपि चेष्टास्वघविवतेरहितेन खरासु रञ्जयता ।। 67 ।। द्वि. च. पा. य

रामोऽथ मुष्टिना भुवमवता डयितारमभ्याशम् ।
अवधीत्प्रलम्बमागतमवताडयिताऽरमभ्याशम् ।। 68 ।। द्वि. च. पा. य

अरमत नुतचरणमयं ससहा मित्रैर्महन्नित्यम् ।
अरमतनुत च रणमयं स सहामित्रैर्महन्नित्यम् ।। 69 ।। समुद्गयमकम्

।। इति श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरे नवमाश्वासः ।।

श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नकरः

अथ दशमोऽऽश्वासः

लक्ष्मीमधिकां समुदितशरदुर्व्यापारजस्सु खाशासु ।
यत्रस्त्रीयु मदस्स्मरशरदुर्व्यापारजस्सुखाशासु ।। 1 ।। द्वि. च. पा. य

हंसकुलं सर उच्चैराशिश्रियदुच्चकैरवकम् ।
नभ इव समुदिततारकराशिश्रि यदुच्चकैरवकम् ।। 2 ।। द्वि. च. पा. य

अरतेस्समये तस्मिन्नलिना निभृताक्षरं त्यागात् ।
गीतं माध्वी ह्यध्यधि नलिनानि भृता क्षरन्त्यागात् ।। 3 ।। द्वि. च. पा. य

दिवसस्य दिवसनाथो विततार कमप्यलङ्कारम् ।
विधुरपुषद् घनविरतावितताारकमप्यलं कारम् ।। 4 ।। द्वि. च. पा. य

मेघा निधातुमनिलैरनिशमनीयन्त दिक्षु पात्रीषु ।
शिखिरूतममतं श्रोत्रैरनिशमनीयं तदिक्षुपात्रीषु ।। 5 ।। द्वि. च. पा. य

लोकं शरदुडुहंसीकैरवकाशैस्समबुभूषत् ।
बहुसितगुणजुषि पङ्कं कैरवकाशैस्समबुभूषत् ।। 6 ।। द्वि. च. पा. य

अनुदन्नर्कस्य तमः पटलं घनतोत्रसन्निभा भासः ।
अरमत गुहासु स तु घनपटलङ्घनतोऽत्रसन्निभाभासः ।। 7 ।। द्वि. च. पा. य

सूनानि श्रीः प्रययावर्यमकरराजितानि कमलिन्याः ।
अलमकृषतास्पदानि तु वर्यमकरराजि तानि कमलिन्याः ।। 8 ।। द्वि. च. पा. य

मदमन्मथौ स्म शरदा नवपुष्करसंपदा ह तायेते ।
रतिकलहे स्त्रीष्वभजन्नवपुष्करसं पदा हता ये ते ।। 9 ।। द्वि. च. पा. य

उदयाद्विन्ध्यमदमुषो विषमच्छदशाऽऽर कान्ताऽरम् ।
जगदभवदुन्मदकरि विषमच्छदशारकान्तारम् ।। 10 ।। द्वि. च. पा. य

भान्ति सरांसि समन्तात्समारूतानि स्म राजीवैः ।
हंसाश्चक्रुः कुमुदैस्समा रूतानि स्मराजीवैः ।। 11 ।। द्वि. च. पा. य

दूरे नद्यवहत्क्षयगा पाथस्स्वादु कूलस्य ।
नवपुलिनश्रीस्तां सदृगापाथ स्वा दुकूलस्य ।। 12 ।। द्वि. च. पा. य

सौख्ये किमहश्शारददिवसैकतमांशवीर्यमितम् ।
भङ्गीर्गतं समन्तादिव सैकतमांशवीर्यमितम् ।। 13 ।। द्वि. च. पा. य

मार्ताण्डेन विकसितं सारसकोकनदमुदितेन ।
वीक्ष्य जनेनारामि ससारसकोकनदमुदितेन ।। 14 ।। द्वि. च. पा. य

रेमे विहगैरूपरतिसज्जघनाकाशवसनेन ।
रेजे सरिदपि सैकतसज्जघना काशवसनेन ।। 15 ।। द्वि. च. पा. य

कुसुमे ललाटिकोचितभा वितरति बन्धुजीवानाम् ।
तरूणीनां श्रीरूदभूद् भावितरति बन्धुजीवानाम् ।। 16 ।। द्वि. च. पा. य

मृगजं नियन्तुमपटुश्शालीनामन्यतोऽपायम् ।
गीतिं कन्या तर्जनशालीनाऽमन्यतोपायम् ।। 17 ।। द्वि. च. पा. य

अपुषद्वनमाश्वसनः पान्थानामुदितपुष्पधामा श्वसनः ।
सुरतजुषामाश्वसनः तत्परिचयलब्धगन्धभूमा श्वसनः ।। 18 ।। समुच्चययमकम्

अपटुषु भास्वश्रूयत सह सावित्रीषु कलमस्य ।
चिह्नमृतोरिव गीतं सहसाऽवित्रीषु कलमस्य ।। 19 ।। द्वि. च. पा. य

अमहन् वृद्धिं गोपा वन्यां शरदो महीयस्याः ।
आपर्द्धिमृतुभ्योऽसावन्यां शरदो मही यस्याः ।। 20 ।। द्वि. च. पा. य

ते वीक्ष्य गतं वीर्यं वर्षस्य दिशामपायसङ्करवत् ।
समविद्रत वृष्णेऽस्य तु वर्षस्य दिशाम पायसं करवत् ।। 21 ।। द्वि. च. पा. य

हरिरवदत्तांस्ताता इष्टेन न वासवेन फलम् ।
दित्सथ सपायसं यत इष्टेन नवासवेन फलम् ।। 22 ।। द्वि. च. पा. य

तत्र श्रोतव्या मे वार्ता वै श्येतरूपाऽन्ते ।
निवसति खलु गोरक्षा वार्ता वैश्ये तरूपान्ते ।। 23 ।। द्वि. च. पा. य

कृषिवणनजेतरेषां विशामसौ ख्यायते विधानेन ।
विहितं नो गोरक्ष्यं विशाम सौख्याय ते विधानेन ।। 24 ।। द्वि. च. पा. य

पर्वतशरणानां नः पर्वतयागेषु चेष्टाऽस्तु ।
सिद्ध्यन्तीष्टेषूदितपर्वतयाऽगेषु चेष्टास्तु ।। 25 ।। द्वि. च. पा. य

तदिमं पर्वतमृद्धं गोवर्धनमेव मानयत ।
उत्सवममत्सरेण तु गोवर्धनमेवमानयत ।। 26 ।। द्वि. च. पा. य

नाहं न चायमधरितवनधरवासाः कृतागा वः ।
वनगिरिशरणास्स्म यद्वनधरवासाः कृता गावः ।। 27 ।। द्वि. च. पा. य

इत्युक्त्वाऽस्य गिरेर्बहुमोदनमभ्याशमानीतम् ।
आस्थायान्यद्वपुरतिमोदनमभ्याश मानी तम् ।। 28 ।। द्वि. च. पा. य

गोपैः कृष्णे मुदिते गोपालसभानुसरणीये ।
कादम्बिन्यावृतदिनगोपालसभानुसरणीये ।। 29 ।। द्वि. च. पा. य

ऐन्द्री महहतिजभयङ्करकोपलभा वितेने ह ।
अरतिं वर्षेण गवां करकोपलभावितेनेह ।। 30 ।। द्वि. च. पा. य

भ्रेमुश्शम्पाः परूषा युगान्तरतमेघसन्निभाभ्रमिताः ।
घानं न पतति वर्षे युगान्तरतमेऽघसन्निभा भ्रमिताः ।। 31 ।। द्वि. च. पा. य

तमसा घननिकरो दिवमापूरयदर्वितेन वा तेन ।
येन स्थास्नुचरा भयमापू रयदर्वितेन वातेन ।। 32 ।। द्वि. च. पा. य

वीक्ष्य विपर्ययजं तत्त्र सुराध्यक्षयज्ञस्य ।
पुर एव हरेर्गोपास्तत्रसुराध्यक्षयज्ञस्य ।। 33 ।। द्वि. च. पा. य

वृष्ट्या जन्तुषु भीषितरूरूहर्यश्वेभया न के भीताः ।
ते शरणं हरिमशनैरूरू हर्यश्वे भयानके भीताः ।। 34 ।। द्वि. च. पा. य

तान्वीक्ष्याद्रिच्छत्रं स धारयामास दण्डभूतकरः ।
रून्धन्नसुखमशन्या सधारयाऽमा सदण्डभूतकरः ।। 35 ।। द्वि. च. पा. य

गोवर्धनं स सुहृदां गवाञ्च महतो भयादरतः ।
दधदासारं समभनगवाञ्चमहतोभयादरतः ।। 36 ।। द्वि. च. पा. य

गोपा हरिमाश्रित्य न वित्रेसुरपायतस्स्थेयम् ।
यो गोवर्धनभृत्कुलिशावित्रे सुरपाय तस्थेऽयम् ।। 37 ।। द्वि. च. पा. य

प्रहसन् कृष्णो न जनितकंपशुनासीरवत्स नाभिरतः ।
नापान्नृष्वखिलेन च कं पशुना सीरवत्सनाभिरतः ।। 38 ।। द्वि. च. पा. य

वीक्ष्यौक्षकमुत्पुच्छं कुञ्चितकन्धरमहीनभस्तेने ।
विफलं तमसि घनं जितकुं चितकं धरमहीनभस्तेने ।। 39 ।। द्वि. च. पा. य

घन इव बभौ हरिर्धृतशतधारधरो रूचा परमः ।
पिञ्छापीडविडम्बितशतधारधरोरूचापरमः ।। 40 ।। द्वि. च. पा. य

उदरे ददृशेऽग्रीमतनुमुन्नमतो दामरेखेह ।
वर्षाक्लिन्ननृमानसमुन्नमतो दामरे खे ह ।। 41 ।। द्वि. च. पा. य

या तत्पाणितलस्य स्वभा वराऽगस्य तत्परासनतः ।
नान्याऽभून्नवनलिनस्वभावरागस्य तत्परासनतः ।। 42 ।। द्वि. च. पा. य

कौस्तुभरविणात्र श्रीर्दिवातनी योज्यते चारूः ।
इन्द्रहृदि स्म परिभवादिवातनीयोऽज्यतेचारूः ।। 43 ।। द्वि. च. पा. य

कुर्वन्नतोऽक्षिरोधे सन्तमसं कुचितमनलमयम् ।
अशमयदशनिमजय्यं सन्तमसङ्कुचितमनलमयम् ।। 44 ।। द्वि. च. पा. य

परितो गावो घासानघसंस्तं भानुसारेण ।
निर्मलयन्तमशेषानघसंस्तम्भानुसारेण ।। 45 ।। द्वि. च. पा. य

तत्र स्म वृषा गवयीमभिधावन्त्येवमाहेति ।
कुञ्जानि तद्रवेण किमभिधावन्त्येवमाहेति ।। 46 ।। द्वि. च. पा. य

शृङ्गाशृङ्गि तु हरिणा वृषभास्तेनेन सङ्ग्रामम् ।
नीता व्याञ्जन् व्रजिनां वृषभास्तेऽनेन सङ्ग्रामम् ।। 47 ।। द्वि. च. पा. य

प्रतिशब्दोऽश्रावि गुहास्वपि मोदध्वं हतेजयत ।
शेष्वऽऽस्व तिष्ठ भुनजै स्वपिमो दध्वं ह तेजयत ।। 48 ।। द्वि. च. पा. य

ददृशुर्भुजया क्षेमं विधाय मुनयो दधिस्पृशा समया ।
अद्रिगया भान्तं सद्विधा यमुनयोदधिस्पृशा समया ।। 49 ।। द्वि. च. पा. य

कण्डूयति तं वात्सकमुपलालयमानमन्तिके च नखे ।
अभितस्सिद्धास्स्म दधतमुपलालयमानमन्ति के चन खे ।। 50 ।। द्वि. च. पा. य

करकाणामपि कार्यध्वस्ताविषुरंहसां चयं तारम् ।
यमयन्तं मुनयस्साध्वस्ताविषुरंहसां च यन्तारम् ।। 51 ।। द्वि. च. पा. य

घनवृतमपेक्ष्य मुनयस्सप्ता हंसं ततकरे ते ।
अतृपन् हरौ गिरावपिस्सप्ताहं सन्ततकरेते ।। 52 ।। द्वि. च. पा. य

अपदानादवयन्तस्समुदं तं नाथमन्यं ते ।
घोपास्स्म सुखाद्वर्षजनमुदन्तं नाथ मन्यन्ते ।। 53 ।। द्वि. च. पा. य

पिञ्छाञ्चितस्सुमनसा धृतावतंसोऽपि लाङ्गलीतेन ।
घोषं भुजेन पर्वतधृताऽऽव तं सोऽपि लाङ्गली तेन ।। 54 ।। द्वि. च. पा. य

इति वृष्ट्या स गवां श्रियमरराजदमन्दयाऽलूनाम् ।
श्रेष्ठो हरिरकृत च नामरराजदमं दयालूनाम् ।। 55 ।। द्वि. च. पा. य

सप्ताहं रेवत्याः प्रत्यूषे देवराजेन ।
आगामि चाष्टमदिनप्रत्यूषे देवराजेन ।। 56 ।। द्वि. च. पा. य

हरिमस्तौदवरूह्य तु मघवांश्चेतोऽभ्रमोरिष्टम् ।
अवदच्चान्वशिषन्मामघवांश्चेतोभ्रमोऽरिष्टम् ।। 57 ।। द्वि. च. पा. य

न जनूंषि विलसतस्ते स्वच्छन्दस्योपधावन्ति ।
दोषा दधि धयतस्त्वत् स्वच्छं दस्योऽपधावन्ति ।। 58 ।। द्वि. च. पा. य

कीडार्थस्तेऽद्रिरसौ नेहेतरसाधनं यतोऽवश्यम् ।
ईशो भवान् हि दाम्ना नेहे तरसा धनं यतो वश्यम् ।। 59 ।। द्वि. च. पा. य

स्वानुज्ञां स हरिबलौ सशिखावलपत्र पालीके ।
मुक्त्वा दधतावुरसी सशिखावलपत् त्रपालीके ।। 60 ।। द्वि. च. पा.

अथ नुतिबलेन कृष्णान्नाकम्पत यस्सुराजा तम् ।
गतमन्वयुरस्तभयं नाकं पतयस्सुरा जातम् ।। 61 ।। द्वि. च. पा.

रक्षंस्तदा हरिर्गाः भाण्डीरेऽमेयमतिरमितः ।
सखिभिस्सहितैर्गोधनभाण्डी रेमेऽयमतिरमितः ।। 62 ।। द्वि. च. पा. य

गौतमभारद्वाजौ सन्नामायागतौ तदामुष्य ।
यद्दुःखं भूरि तयोस्सन्ना मायाऽऽगतौ तदामुष्य ।। 63 ।। द्वि. च. पा. य

विप्रावृषीह समये सङ्गत्याऽगेन देवमुदितमितौ ।
विप्रावृषी ह सङ्गत्यागेन देवमुदि तमितौ ।। 64 ।। समुद्गयमकम्

अक्षिप्रयोजनगतावावृत्त्या हीनमायातम् ।
अक्षिप्रयोजनगतावावृत्त्याऽहीनमायातम् ।। 65 ।। समुद्गयमकम्

सुहितौ नत्वायातौ सदा श्रयं यादवं च कम्पान्तम् ।
सुहितौ नत्वा यातौ सदाश्रयं यादवञ्चकं पान्तम् ।। 66 ।। समुद्गयमकम्

।। इति श्रीमत्कूरत्ताल्वाननुगृहीतयमकरत्नाकरे दशमाश्वासः ।।

श्रीमत्कूरत्ताल्वान् प्रणीतयमकरत्नाकरः

अथ एकादशाश्वासः

स्पृहयन् गुणाय पापाद्धर्मदयाजाय योऽपेतः ।
गोपः कुम्भकनामा धर्मदयाजाययोपेतः ।। 1 ।। द्वि. च. पा. य

मिथिलाख्यं यस्संश्रितविदेहमध्यावसन्नाकम् ।
यमकृत नीला स्वसुता विदेहमध्यावसन्नाकम् ।। 2 ।। द्वि. च. पा. य

गोष्वजनिषतास्योदितकलि तनयाः कालनेमीयाः ।
निन्युरशं गर्भस्याकलितनयाः कालनेऽमी याः ।। 3 ।। द्वि. च. पा. य

स खलु यशोदाभ्राता सत्यपरो धेनुमानात्तान् ।
असुरान्मेने जगतस्सत्यपरोधेऽनुमानात्तान् ।। 4 ।। द्वि. च. पा. य

स प्रतिजज्ञेऽथैषां मापयितारं वरं नीला ।
वरयिष्यत्यस्मान् सुखमापयितारं वरं नीला ।। 5 ।। द्वि. च. पा. य

साऽश्रूयत हरिणा जनसमूहतः किंवदन्ती ह ।
पर्यहसन् सोऽन्ये बलसमूहतः किं वदन्तीह ।। 6 ।। द्वि. च. पा. य

स ततस्संप्रयियासितजनकपुरो गोपचकमेजितवान् ।
क्लान्तिं बृन्दावनतो जनकपुरोगोऽप चकमे जितवान् ।। 7 ।। द्वि. च. पा. य

स सह बलेन स्वेष्टं विदितवताऽगच्छदच्छायाः ।
भासश्श्रियार्कवत्पथि विदितवताऽग्च्छदच्छायाः ॥ 8 ॥ द्वि . च . पा . य

मार्गं सखिभिस्स्म द्राग्ग्रामपुरस्सरतया धिया तरति ।
दृष्टवनागजनपदग्रामपुरस्स रतया धिया तरति ॥ 9 ॥ द्वि . च . पा . य

तस्य खरं पथि मरुता न ववेऽतसराजिकायस्य ।
नद्यः प्रीणयन्यो भृतनववेतसराजिका यस्य ॥ 10 ॥ द्वि . च . पा . य

उद्वहनमभिध्यायन् भावि विदेहानमा रामैः ।
सखिभिरितश्श्रान्तेरुद्भा विविदे हानमारामैः ॥ 11 ॥ द्वि . च . पा . य

श्रयति मदने युवमनश्शाले यानन्तके दारान् ।
न जहाति जनो लसतश्शालेयानन्तकेदारान् ॥ 12 ॥ द्वि . च . पा . य

केदारेष्वरविन्दं नवशालीनां च मूर्धानम् ।
भजति रसस्याध्यधि यानवशालीनां चमूर्धानम् ॥ 13 ॥ द्वि . च . पा . य

यत्कलमलवेऽब्जेषु प्रसृतिमिता जातरूपाभाः ।
सूञ्छाः कलमा येषां प्रसृतिमिता जातरूपा भाः ॥ 14 ॥ द्वि . च . पा . य

यत्सरसीषु रमन्ते कलहंसा रसकलापेन ।
कुर्वन्तस्सह रवजं कलहं सारसकलापेन ॥ 15 ॥ द्वि . च . पा . य

यत्र वृषा युद्ध्यन्ते समृच्छमानास्स्थितानरात् ।
वित्रास्य विषाणमिता समृच्छमानास्थिता नारात् ॥ 16 ॥ द्वि . च . पा . य

यद्भूमौ श्रीस्स्वयमधिमुत्कृष्टायमजायतामित्याम् ।
जनकोऽदित यां प्रीरूयुत्कृष्टायामजाय तामित्याम् ॥ 17 ॥ द्वि . च . पा . य

द्रुततिस्सार्का यत्रोपवनेषु क्षपयते हरितम् |
सा खलु तेषु सुशीतलपवनेषु क्षपयतेऽहरितम् || 18 || द्वि . च . पा . य

मधु यत्र मधुव्रतकुलमधुनाना मल्लिका क्षरति |
उम्भत्यम्भोऽब्जं सृतमधु नानामल्लिकाक्षरति || 19 || द्वि . च . पा . य

यास्तु तरूण्यः प्राप्ताः पृथुलकुचघटावनमनं ताः |
भूषन्ति यदुद्यानां पृथुलकुचघटावनमनन्ताः || 20 || द्वि . च . पा . य

सुखिनो यान् परितोऽन्वितनागस्पन्दनकरञ्जवनम् |
यन्त्यनिलं मृदुमुग्रं नागस्पन्दनकरं जवनम् || 21 || द्वि . च . पा . य

यत्र छदनैः पिञ्छछत्रायन्ते समञ्चिताः पूगाः |
येषां तमो गतिमिवेच्छत् त्रायन्ते समं चिताः पूगाः || 22 || द्वि . च . पा . य

ये भान्ति फलस्य चयात्कण्ठाभरणायमानस्य |
यैर्युवयुवतीनां नोत्कण्ठा भरणाय मानस्य || 23 || द्वि . च . पा . य

व्रजता हरिणा संभृतजम्भासु रसादनेन वसुधासु |
तासु मुमुदेऽग्रजीकृतजम्भासुरसादनेन वसुधासु || 24 || द्वि . च . पा . य

वीक्ष्य बलोऽप्युपवनमितजम्भीरामलकपुन्नागम् |
यातो विडम्बयन् दिविजं भीरामलकपुन्नागम् || 25 || द्वि . च . पा . य

कृत्वा वृषान्निनीषुस्स मतो रणमण्डनाभिरामान्तम् |
जनकपुरमैद्धरिधनुस्समतोरणमण्डनाभिरामान्तम् || 26 || द्वि . च . पा . य

यत्परिसरेण संश्रयदिक्ष्वाकुलसत्कुलीनरामेण |
जातं कलमक्षेमकृदिक्ष्वाकुलसत्कुलीनरामेण || 27 || द्वि . च . पा . य

यत्स्त्रीगतिमभ्यस्येव धार्तराष्ट्रास्सरोगता महिताः |
यान्ति च यत्र सुराज्ञां वधार्तराष्ट्रास्सरोगतामहिताः || 28 || द्वि . च . पा . य

यत्प्रासादैर्विहतिं विमानयात्राऽयते नभोगानाम् ।
यत्र स्त्रिया विघातो विमानया त्रायते न भोगानाम् ।। 29 ।। द्वि . च . पा . य

यत्स्त्रीर्वीक्ष्य गृहोपरि सत्रपया भज्यते परावृत्तिः ।
दिवि दिव्यया स्त्रिया सुरसत्रपया भज्यते परा वृत्तिः ।। 30 ।। द्वि . च . पा . य

यत्र स्त्रियो रमन्ते मुद्यानान्मत्तवारणादधिकम् ।
न यदीयात् किल नन्दनमुद्यानान्मत्तवारणादधिकम् ।। 31 ।। द्वि . च . पा . य

यत्र वधूरूर्वश्या समेनकारम्भया समा सक्ते ।
पत्यौ रमते मन्मथसमे न काऽरं भया समासक्ते ।। 32 ।। द्वि . च . पा . य

रथ्यान्तरं यदीयं वस्त्यध्वजवार्यमाणहंसमहः ।
तेन धिया वर्षर्तावस्त्यध्वजवार्यमाणहंसमहः ।। 33 ।। द्वि . च . पा . य

यत्र च सदृशी रत्नावली कनिष्ठा पतङ्गानाम् ।
स्मरदा च कृत्रिमखगी वलीकनिष्ठा पतङ्गानाम् ।। 34 ।। द्वि . च . पा . य

यत्राब्जं निशि विकसति रूचिरमणीनां सदालोकात् ।
अहनि कुमुदं मुखादतिरूचिरमणीनां सदा लोकात् ।। 35 ।। द्वि . च . पा . य

यत्र सुचारित्राढ्याश्चतुराश्रमहारिणो वर्णाः ।
सरसां च साम्बुजानां चतुरा श्रमहारिणो वर्णाः ।। 36 ।। द्वि . च . पा . य

यत्र भजन्ति नृपा बहुदा दर्शं पूर्णमासमतिरात्रम् ।
दधति स्त्रिय उपरिगृहादादर्शं पूर्णमासमतिरात्रम् ।। 37 ।। द्वि . च . पा . य

अथ कुम्भकेन समगात् स मातुलेन प्रतीतेन ।
प्रीतिर्बभ्रे येनासमाऽतुलेन प्रतीतेन ।। 38 ।। द्वि . च . पा . य

समवस्थापितमङ्गलकुम्भकसदनेकसत्कृतिभिः |
मह एधितः परिजनैः कुम्भकसदनेऽकसत् कृतिभिः || 39 || द्वि . च . पा . य

नीलाऽस्निह्यद्यं भृशमाकर्णनया क्षमायां तम् |
साक्षादकरोदच्युतमाकर्णनयाक्षमायान्तम् || 40 || द्वि . च . पा . य

जघनेन च मध्येन च गुर्वी क्षामा समा धवं कामम् |
रूपेण जयन्तं शुभगुर्वीक्षामास माधवं कामम् || 41 || द्वि . च . पा . य

नीला तौ वीक्ष्याद्भुतरतिकौ तु कमन्यथाभूतम् |
हरिमैक्षतात्मनि सुधीरतिकौतुकमन्यथाभूतम् || 42 || द्वि . च . पा . य

नवया रूचा श्रितौ तावितरेतरसङ्गवाहितया |
वेषस्तयोर्न कं व्यतिवितरेत रसं गवा हि तया || 43 || द्वि . च . पा . य

सा तं स च तां सहसा प्रैषीत्कामं महीयमानमिति |
तं प्रति तु साऽक्षिपातैः प्रैषीत्कामं मही यमानमिति || 44 || द्वि . च . पा . य

अभृत नु हंसगणस्तां दिव्यपदव्याजजलजगतः |
अपदं या किल विदिता दिव्यपदव्याजजलजगतः || 45 || द्वि . च . पा . य

अवनतमम्बुजयुगमिव रसाधिवासाय पदयुगलम् |
येन हरेर्हृदि रतिपतिरसाधि वासाय पदयुगलम् || 46 || द्वि . च . पा . य

अब्जे कुचिते नु पदे नखराजासन्नभावेन |
यद्गेनाघाप्तिरियान्न खरा जासं न भावेन || 47 || द्वि . च . पा . य

तत्पादगतश्चन्द्रो विकलङ्कतमोऽवसद्दशत्वेन |
वर्तेत तादृशपदे विकलं कतमोऽवसद्दशत्वेन || 48 || द्वि . च . पा . य

अवनतपदाब्जनालकसमजङ्घा तस्य सा धनवत् |
याऽऽत्मभुवः प्रति युवपशुसमजं घातस्य साधनवत् || 49 || द्वि . च . पा . य

ऊरू दधौ हरेस्सा मनोरमा रम्भयोर्वश्या ।
सदृशौ न यत्समा सह मनेरमा रम्भयोर्वश्या ॥ 50 ॥ द्वि . च . पा . य

जघनालाने स्वस्मिन्न कम्प्रपञ्चेषु सारेभे ।
मोहयितुं तरूणां न कं प्रपञ्चेषु साऽऽरेभे ॥ 51 ॥ द्वि . च . पा . य

वेदिप्रतियातनया सदुदरलक्ष्म्या स्तनोद्यदतियातनया ।
हरिबहुमतियातनया रेजेऽभूत्कुंभके महति या तनया ॥ 52 ॥ समुच्चयथमकम् (अन्तिमपदयमकम्)

रसनद्या नाभिरभूदावर्ततया शुभा रचिता ।
स्तनलक्ष्मीर्मध्ये रसदाऽऽवर्तत याऽऽशु भारचिता ॥ 53 ॥ द्वि . च . पा . य

लौहीव धृतिशलाका सा रोमाली कृतोदर्या ।
नाभ्या याऽस्ता श्रिय इव सारो मालीकृतो दर्या ॥ 54 ॥ द्वि . च . पा . य

स्मारं भृतकुचयौवनरसकलशमनोद्यमाचारम् ।
अधित युवघातने तनुरसकलशमनोद्यमा चारम् ॥ 55 ॥ द्वि . च . पा . य

भातं तया भुजा जितसन्तानस्कन्धकं धरया ।
सुसदृश्या संश्रितरससन्तानस्कन्धकन्धरया ॥ 56 ॥ द्वि . च . पा . य

संप्रीण्य हरिं स्माश्रितवत्सलतायाः प्रियं करौ भातः ।
किसलयवन्नीलाह्वयवत्सलतायाः प्रियङ्करौ भातः ॥ 57 ॥ द्वि . च . पा . य

प्रगुणितगुणेन किं लसदाननमस्या दिनाब्जेन ।
उत विमलितेन कृतमितदाननमस्यादिनाऽब्जेन ॥ 58 ॥ द्वि . च . पा . य

निरूपमतमकण्ठाधरनासाद्यं गोऽभिरामतया ।
विलसल्लपनं बभ्रेऽनासाद्यं गोभिराम तया ॥ 59 ॥ द्वि . च . पा . य

अदधान्नेत्रे ह्युपमितविसारिणी साधुनी वामा ।
भूर्मिश्रिया समेते विसारिणी सा धुनीवामा ।। 60 ।। द्वि . च . पा . य

तद्वीक्षितं हरिं स्मरदष्टमतिथिमाललम्बेऽरम् ।
अलिकं तस्यास्समभादष्टमतिथिमाललं बेरम् ।। 61 ।। द्वि . च . पा . य

यौवनरसैरसौ लसदलिकाऽलकमधिततता पिञ्छम् ।
अतिगतमपि कान्त्या लसदलिकालकमधित तापिञ्छम् ।। 62 ।। द्वि . च . पा . य

हरिणा तयैव तस्मिन्नर्चाऽऽयजुषा ससाम्नाऽऽपि ।
यन्महिमेयत्तोक्ता नर्चा यजुषा ससाम्नाऽपि ।। 63 ।। द्वि . च . पा . य

आर्चदथ कुम्भको द्रागर्हणया नन्दगोपमायोगात् ।
स कृतार्थतां विहीनो गर्हणयाऽऽनन्दगोऽपमायोऽगात् ।। 64 ।। द्वि . च . पा . य

अथ तेन चकलाङ्गलहेती समभाविषातां तौ ।
यौ पथ्यर्कजपावकहेतीसमभाविषातान्तौ ।। 65 ।। द्वि . च . पा . य

वाचं तु कुम्भकोऽग्रे नन्दादीनामुदाजह्रे ।
कृष्णेन यया कृतसखिनन्दाऽदीना मुदाजह्रे ।। 66 ।। द्वि . च . पा . य

इह के वृषभानेतानसुरानाहन्तुमाम कीनाशाः ।
यद्वधतोऽर्हयितुमलं न सुरा नाहं तु मामकीनाशाः ।। 67 ।। द्वि . च . पा . य

बलिभिरपि दुग्रहो बहुमायातानान्नयातीतः ।
एषामेको मद्गृहमायातानां न यातीतः ।। 68 ।। द्वि . च . पा . य

एते यैः खल्वस्यां कौ मार्यास्सवदैतेयाः ।
उद्वहनान्नीलायाः कौमार्यास्सवदैतेऽयाः ।। 69 ।। द्वि . च . पा . य

ज्ञानस्य प्रति बुद्धिं वृषाकपीयामधीरभावेन ।
नाकृत परिषच्छङ्कितवृषा कपीयामधीरभावेन ।। 70 ।। द्वि . च . पा . य

विभयो दयमानो हरिरुद्युक्तो मारणे समुत्तस्थौ ।
विभयोदयमानो हरिरुद्युक्तोऽमा रणे समुत् तस्थौ ।। 71 ।। समुद्गयमकम्

इति श्रीमत्कूरत्ताल्वाननुगृहीत यमकरत्नाकरे एकादशाश्वासः

श्रीमत्कूरत्ताल्वाननुगृहीत यमकरत्नाकरः

अथ द्वादशाश्वासः

प्राक्रमत स गन्तुं वृषसमजं घाताय नन्दयिता ।
सा यता इयात् स्मरेषुधिसमजङ्घा तायनं दयिता ।। 1 ।। द्वि . च . पा . य

हन्तुं हर्षितधैर्यातुलसीरभृतो रसादरीनेता ।
स तु दामकीलचन्द्रकतुलसीरभृतोरसाऽऽदरी नेता ।। 2 ।। द्वि . च . पा . य

दारादराददूरादारोरोदो दरारिररः {ललः} ।
दारी दूरादारोदारो रोदोदरारिररः ।। 3 ।। द्वि . च . पा . य

भारिभिरारोऽरिभिरारारे भेरीभरे भीरः ।
भीरा रीरा भूरीरारेभेऽरीभरेभीरः ।। 4 ।। द्वि . च . पा . य

हरिरारावेण शुभाकारेणाकारणाकारः ।
शुशुभेऽरीणामिह भीकारेणाकारणाकारः ।। 5 ।। द्वि . च . पा . य

देवानां तत्येक्षितुमायोधनमभ्रमास्थाय ।
ये मेनिरे हरिर्नोऽमायो धनमभ्रमाः स्थाय ।। 6 ।। द्वि . च . पा . य

स्वर्धि वृषान् धनं महदिति जानाना विधारयतः |
दिवि समगंसत सर्वे दितिजा नानाविधा रयतः || 7 || द्वि . च . पा . य

सा तेनानेन भयाविला सभा जानतेनेन |
जलदनिभेन भगवता विलासभाजा न तेने न || 8 || द्वि . च . पा . य

यस्त्रिदशारातीनां गदाधरस्संयतीरयिता |
श्रेयांसि ददृषीणां गदाधरस्संयतीरयिता || 9 || द्वि . च . पा . य

यस्सन्ननया संश्रितनयया चक्रीडया चेत्यः |
एतां दैत्यारिर्निहि न ययाच क्रीदया चेत्यः || 10 || द्वि . च . पा . य

दुष्टानां घ्नन्नारात् सकोटरावणकदण्डकावनतः |
भूमौ रतवान् प्राक्कृतसकोटरावणकदण्डकावनतः || 11 || द्वि . च . पा . य

लीलालालोऽलोलो लालालालीललोऽलीलः |
लीलालालोलोलोऽलालालाली ललो लीलः || 12 || समुद्गयमकम्

अभियान्तं वीक्ष्य हरिं रूरूषुरसन्तो वृषा रातीन् |
पान्तस्सिंहा इव सुररूरूषु रसन्तो वृषारातीन् || 13 || द्वि . च . पा . य

कृष्णं ततो वृषगणादायादेको महोक्षोऽभि |
तेन तु धीरेऽस्मिन् यदुदायादे को महोऽक्षोभि || 14 || द्वि . च . पा . य

पापारिरपि पुरोऽरेरापारोऽपारपररूपः |
पुररिपुरूपोऽरिरूरापारोऽपार पररूपः || 15 || द्वि . च . पा . य

तं वृषभमभिद्रवतो द्विषाणमग्राहितपदस्य |
हस्तेन हरेस्तु जगद्द्विषाणमग्राहि तपदस्य || 16 || द्वि . च . पा . य

तत्तत्तातिततततातततोऽतितातोऽततातीतिम् |
तोत्ताऽतीतेऽतीते ततोऽतिताऽतोऽतताऽतीतिम् || 17 || द्वि . च . पा . य

मुद्दो मेदी मोदी मदी दमददो मृदुद्दामम् |
मेदोदुदादिमोऽमदमदीदमददामृदुद्दामम् || 18 || द्वि . च . पा . य

निहतात् स सम्मतिं सुरसमाजगामाप दानवतः |
अपरो वृषभोऽस्य पुरस्समाजगामापदावनतः || 19 || द्वि . च . पा . य

धाराधरर्धिरधिधीरद्धा धीरो धराधरः |
रूरूधेऽरिधराधरधूरद्धाधीरोऽधराधरः || 20 || द्वि . च . पा . य

ऋजुरजरोऽरेराजीराराजो राजराजोऽर्जः |
रेजे जूररिराजेराराजो राजराजोर्जः || 21 || द्वि . च . पा . य

तुत्तु पपाताप्तापतत्पतितोपेतोपतापिततः |
पाते पततोऽतीतः पतितोऽपेतोऽपतापिततः || 22 || द्वि . च . पा . य

अन्यो वृषस्तु कृष्णं समाययाविध्यमानमायन्तम् |
कर्तुं किल बहुमायं स मायया विध्यमानमायं तम् || 23 || द्वि . च . पा . य

वेदविदादावावेदवदावो देवदेवोऽदः |
दिवि देवद्वां विवदद्दवदावो देवदेवोऽदः || 24 || द्वि . च . पा . य

स ससार सीरिरसरस्सुरसारस्सूरसारारी |
सूरिरसुरारिरूरूरीसुरसारस्सूरसारारी || 25 || द्वि . च . पा . य

हेरारोही रंही हरिरंहोहारिहा हारी |
राहोररिरारार्हो हरिरंहोहाऽरिहा हारी || 26 || द्वि . च . पा . य

रेरेरारोऽरीरोरूरूरीरारोऽररोरोरः |
रोरूरोऽरौ रैरीरूरूरीरारो ररोऽरोरः || 27 || द्वि . च . पा . य

जहतं प्राणैरेनं सममर्दनतोऽग्रशृङ्गारम् ।
सहसा प्राप्याऽरेषं स ममर्द नतोग्रशृङ्गारम् ।। 28 ।। द्वि . च . पा . य

क्रीडन्नेव स कृष्णो निरास्थतामास्थितश्चतुरः ।
सखिभिरितरान्महोक्षान्निरास्थतामा स्थितश्चतुरः ।। 29 ।। द्वि . च . पा . य

मृतिभीर्वृषतत्याऽथाशिवाऽऽश्ववेता लयाततया ।
रणभू रेजे प्रमुदितशिवाश्ववेतालयाततया ।। 30 ।। द्वि . च . पा . य

काकाकूकूकाके कोके कङ्के कुके काके ।
कौ कौ काकाङ्केऽकुककोके कङ्केऽकुकेकाके ।। 31 ।। द्वि . च . पा . य

असुरगणेन प्रमदो व्यधमानेनाम्बरेऽहायि ।
हीनेन विलपितं दिव्यथ मानेनाम्ब रे हाऽऽयि ।। 32 ।। द्वि . च . पा . य

ईयुर्दिशि दिशि भीतिर्भूरीति विनीतिभृन्नीति ।
उरूरूत्प्रीतिर्भूष्णुर्भूरीतिविनीतिभृन्नीति ।। 33 ।। द्वि . च . पा . य

रेमेऽमरारिमारी रामारामो रमारामः ।
माराररिर्मुरारी रामारामोऽरमारामः ।। 34 ।। द्वि . च . पा . य

कुम्भकसुतेन महिमा श्रीदाम्ना यादवस्य तोदयतः ।
वृषभानाज्ञायि धियः श्रीदाम्नायादवस्यतोदयतः ।। 35 ।। द्वि . च . पा . य

तुष्टस्तुष्टाव च तं नीलाभ्राताऽयमानतोऽपचिता ।
दिव्या यस्य रूचिर्जितनीलाभ्रा तायमानतोपचिता ।। 36 ।। द्वि . च . पा . य

देव श्रीवर पर गां वक्ष्यामि स्वामिताधार ।
श्रीमद्दास्यश्रियमुपवक्ष्यामि स्वामिताधार ।। 37 ।। द्वि . च . पा . य

भगवन् भवन्तमाद्यं जाने त्रायस्व नोदास्यम् ।
अद्य प्रभृति तु लक्ष्मीजानेऽत्रायस्व नो दास्यम् ।। 38 ।। द्वि . च . पा . य

परमायातस्स्वरतेर्दूरक्षेमेण मां रक्ष ।
परमाऽऽयास्स्वरतेस्वैरं ध्येयातसीरम्य ।। 39 ।। प्रथमतृतीयपादयमकम्

सङ्गं त्वत्पादेऽब्जारूणधामनि रंहसाऽधियाचाम ।
गणयादे संसारं रूणधाम निरंहसा धिया चाम ।। 40 ।। द्वि . च . पा . य

नूनं ना ना नाना नेनानेना न नो नोनान् ।
ननु नानीननोऽऽनुन्नानेनानेनाननो नो नान् ।। 41 ।। द्वि . च . पा . य

शेषाशाशोऽशोषश्शेषाशेषोऽशिषोऽशेषम् ।
शेषी शेषीशेशश्शेषाशेषोऽशिषोऽ शेषम् ।। 42 ।। द्वि . च . पा . य

भीमे भीमोऽमाभाभूमाऽभामोऽभिमाभूमिः ।
भौमाम्भोभोमाभूर्भूमाभामोऽभिमाऽभूमिः ।। 43 ।। द्वि . च . पा . य

मायामायामायामायामऽऽयामयाऽऽमाया । (समुद्ररूप)
मा या मायामायामायामायामायाऽऽम या मयाऽमाऽऽया ।। 44 ।। महायमकम्

या याऽयायायाया सा सा सा साऽऽससा सासा ।
मामामामामामाऽऽपापापापाऽपपापापा ।। 45 ।। प्रतिपादमादिमध्यान्तयमकम्

स्वददस्व स्वददस्व त्रासासात्र त्रसासात्रा । अनुलोमप्रतिप्रतिलोमपादः
प्रतत प्रप्रततप्र त्रासासात्रत्र सासाऽऽत्रा ।। 46 । अयुक्पादयोरर्धपादयमकम्

मारामासद्धाराजाते त्रासह रमा रामा ।
मारामार ह सत्रा तेजा राद्धा समारामा ।। 47 ।। अर्धप्रतिलोमादिमध्यान्तयमकम्

कं ह्यचलाऽऽप्ता हेऽवक सत्या युक्ताऽभवन्नाथा ।
ध्वंसितशत्रुप्राथित सत्यायुक्ता भवन्नाथा ।। 48 ।। द्वि . च . पा . य

यस्य भयस्य भरो मा मत्राप त्रापत्राभीक ।
कामित कामितद्वारो नाहं नाहं भजे हेयम् ।। 49 ।। पादादियमकम् ।।

चक्रे चक्रेश सपदि काऽनेका नेह भीस्सादम् |
रक्षितर क्षितशोका तस्तेऽतस्ते रिपौ नव्यम् || 50 || पादाद्रियमकम्

श्रीतश्श्रीत धराऽधिप वत्सावत्सारणोदारा |
साङ्गा साऽङ्गाश्रितवशकः पाकः पापजो घोरः || 51 || पादाद्रियमकम्

सृजतो जगदमुना किं भवदीयेतापदानेन |
मह्यं त्वयाऽतिभक्तोद्भव दीयेतापदानेन || 52 || द्वि . च . पा . य

स्थेयं मयि दुःखेन न भवदीये तापदानेन |
भावत्को देहाश्रितभव दीयेताऽऽपदा नेन || 53 || द्वि . च . पा . यं

यायायायायायायायायायाय या ययाऽऽयायाः |
याऽयायायायाया या यायायाय याऽऽययायायाः || 54 || महायमकम्(समुद्गयमकम्)

आआ आआ आआ आआ आआ आआ आआ आआ |
आआ आआ आआ आआ आआ आआ आआ आआ || 55 || महायमकम् (एकाक्षरी)

घनमननमनघ नय दय यदयन मदरद दरदम नयदययदयन |
तपनप पनपत पर वररवरप नवनव वनवन परवररवरप || 56 || महायमकम् (त्र्यक्षरी)

दददददददददददददद दददददद ददद दददददददददद |
दददददददददद ददद ददद दददद दददद दददददददद || 57 || एकाक्षरी महायमकम्

सकलापदानवास स्व यमय नीलाञ्जनाभवर |
सकलाप दानवास स्वय मय नीलाञ्जनाभवर || 58 || (समुद्गद्वयेन)

सकलाप दानवास स्वयमय नीलाञ्जनाभ वर | महायमकम्
सकलापदानववास स्वयमय नीलां जनाभ वर || 59 ||

परिरम तया तु तन्द्रीं विहाय साकं समारेण |
सा भवता यात्वमलितविहायसा कं समारेण || 60 || द्वि . च . पा . य

रक्ष च लोकान् प्रमुदित विहायसा कंसमारेण ।
धार्य न न सदृशा काविहायसा कं समारेण ।। 61 ।। द्वि . च . पा . य

ब्रह्मादिष्वपि देव श्रीदामाज्ञा तवानद्धा ।
इत्यस्तुत हरिमेषः श्रीदामा ज्ञातवानद्धा ।। 62 ।। द्वि . च . पा . य

कृष्णस्याभावि ततस्सख्या तस्यऽऽज्ञया तेन ।
प्रियकृत्तथा हि नृतया स ख्यातस्याज्ञयातेन ।। 63 ।। द्वि . च . पा . य

हत्वा वृषान् रूषा ये समुपायंस्तावदाततया ।
नीलां कुलस्य कृष्णस्समुपायंस्तावदाततया ।। 64 ।। द्वि . च . पा . य

उदभासि मनोरमया दुरापकान्त्या तया त्वतिमनोरमया ।
कृष्णः कमनोऽरमयादिष्टं सदृशा ययाऽरिदमनो रमया ।। 65 ।। समुच्चययमकम्

अधिका सा रम्भातस्सहामरैर्नित्यनर्मसारम्भातः ।
इतरससारं भातः स्म यद्रूरू प्रति किलाञ्जसा रम्भातः ।। 66 ।। समुच्चययमकम्

नीला स च जेतोक्ष्णामविक्षताङ्गो वृषावरजः ।
समदाविव बृन्दावनमविक्षतां गोवृषावरजः ।। 67 ।। द्वि . च . पा . य

साऽरमतानेनायुतकामनयर्द्ध्या सहासीना ।
सारमताऽनेना युतकामनयर्द्ध्या सहासीना ।। 68 ।। समुद्गयमकम् .

।। इति श्रीमत्कूरत्ताल्वाननुगृहीत यमकरत्नाकरे द्वादशाश्वासः ।।

श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरः

अथ त्रयोदशाश्वासः

शरदृतुमुच्छोषितघनसरिरं सुरपत्यरीतिमानीतः |
स्त्रीभिरभून्नदं प्रति सरिरंसुरपत्यरीतिमानीतः || 1 || द्वि . च . पा . य

स्नेहमभिवर्षता स्त्रीरासारं भानुरोधाय |
कृष्णघनेनैषि तमी रासारम्भानुरोधाय || 2 || द्वि . च . पा . य

अनुसरदिव धाम हरिं हरिदश्वीयं तदा शान्तम् |
नयदपि रवेरितापरहतिदश्वीयं तदाशां तम् || 3 || द्वि . च . पा . य

रवितापास्तु विरहिणीरथाङ्गना मानमन्यूनाः |
आशिश्रियुरपि विहगं रथाङ्गनामानमन्यूनाः || 4 || द्वि . च . पा . य

हारिद्र्यो रजति रवापीततयाऽर्यमच्छवयः |
तन्नूपुरति स्म गिरा वापीततयाऽऽर्यमच्छवयः || 5 || द्वि . च . पा . य

व्यतिरूरूविरे खगाल्यो निवासतरूजालमभितोऽयाः |
कोका ध्यात्वाऽघौघानिवासत रूजाऽलमभितोयाः || 6 || द्वि . च . पा . य

द्रष्टुमिवार्कं स्म तरोर्दूरं धावतितरां छाया |
पातिव्रत्यं स्म रवेर्दूरन्धाऽवतितरां छाया || 7 || द्वि . च . पा . य

गावश्श्रमं वनान्तादावर्तन्तापनीय समम् |
आतपतोऽब्धिजलं स्फुरदावर्तं तापनीयसमम् || 8 || द्वि . च . पा . य

वीक्ष्याब्जकुमुदषण्डं समदशतालिं गवा तदर्पितया |
ततृपुस्तरूणास्तदुभयसमदशतालिङ्गवातदर्पितया || 9 || द्वि . च . पा . य

बहुनाऽऽक्रोशि कामति कुं कुमवर्णे पतङ्गेन ।
रूचिरूचितात्वतिरागिणि कुङ्कुमवर्णे पतङ्गे न ।। 10 ।। द्वि . च . पा . य

दोषागमतो राज्ञा गाहित्वा वाऽरिधौतमोदेन ।
सुकृतेहतयोदजिगमिषि गा हित्वा वारिधौ तमोदेन ।। 11 ।। द्वि . च . पा . य

धिग्जीवितमति हास्यं सविता नस्सप्रभोऽस्तमितः ।
इति किल दिवसोऽस्य सुहृत्सवितानस्स प्रभोस्तमितः ।। 12 ।। द्वि . च . पा . य

भास्वान् हतप्रभः किल वारूण्या पीतया पतितः ।
निगृहीतो जगतोऽभूदारूण्यापी तया पतितः ।। 13 ।। द्वि . च . पा . य

बिम्बेऽक्षिपन् द्विजा जलमतिरोधिन्याञ्जलं सान्ध्यम् ।
यावन्न जगत्स्यान्निशि मतिरोधिन्यां जलं सान्ध्यम् ।। 14 ।। द्वि . च . पा . य

कुमुदं चाह्नि प्रमुदितचक्रे मुक्तामयं सितं वियति ।
रासाय भैर्वितानं चक्रे मुक्तामयं सितं वियति ।। 15 ।। द्वि . च . पा . य

न्यविशत नूनं सान्ध्यो रागो हृदयं चिरण्डीनाम् ।
बुद्धिं नियम्य च कमितुरागोहृदयं चिरं डीनाम् ।। 16 ।। द्वि . च . पा . य

तमसो भियेव विवशा सन्ध्याऽऽयत्सु द्विजेषु च कुलायम् ।
क्वापि न्यलीयत हरिं सन्ध्यायत्सु द्विजेषु च कुलायम् ।। 17 ।। द्वि . च . पा . य

खतरोश्छायेव तमोऽसूनायन्ताशु भानि भूतानि ।
रात्रिचराण्यामिषतोऽसूनायन्ताशुभानि भुतानि ।। 18 ।। द्वि . च . पा . य

अरूध दृशस्तमो जितकालायसमञ्जनोपमानमति ।
ऐर्ष्यद्विरही तस्मै कालाय समं जनोऽपमानमति ।। 19 ।। द्वि . च . पा . य

नाज्ञायि तमसि वृक्षो ना श्वभ्रं सानुमानपरम् ।
वायुवशाद्यदवायन्नाश्वभ्रं साऽनुमा न परम् ।। 20 ।। द्वि . च . पा . य

अभिसारिकास्स्म तमसा सूच्यन्तेनाप्यसेव नीयेन |
स्थगिता गन्धेनारात् सूच्यन्तेऽनाप्य सेवनीयेन || 21 || द्वि . च . पा . य

हन्त रूचयेऽल्पकाश्रितखद्योताय प्रदोषतमः |
यदुपगमोऽकयिर्ष्यत् खद्योताय प्रदोषतमः || 22 || द्वि . च . पा . य

कालनिषिक्तं गर्भं प्राची रक्षति करैरूचितम् |
पाण्डुमुखीन्दुं स्म तमः प्राचीरक्षतिकरै रूचितम् || 23 || द्वि . च . पा . य

स्मररङ्गसूत्रधारस्तिमिरयवनिकान्तरं गमितः |
विधुरब्धिर्वेलां बहुतिमिरयवनिकां तरङ्गमितः || 24 || द्वि . च . पा . य

क्षणमुदयो हरवदभाच्चन्द्रकलाभास्वरोऽगोऽतः |
कामस्त्रीषु सकबरीचन्द्रकलाभास्वरोगोतः || 25 || द्वि . च . पा . य

हरिरासोत्सवमङ्गलकुम्भरसमितं समुद्यन्तम् |
ऐक्षत जन इन्दुं रसकुं भरसमितं समुद्यन्तम् || 26 || द्वि . च . पा . य

सोद्यन् सिन्दूरितसुरसिन्धुरविभ्रममलम्बत सरागः |
क्षणमभृत जनश्चाश्रितसिन्धुरविभ्रमलं बत सरागः || 27 || द्वि . च . पा . य

ददृशुरितं विधुमवमतपद्माकरकं तु कायमानेन |
उत्पद्मरागगनविहरत्पद्माकारकन्तुकायमानेन || 28 || द्वि . च . पा . य

रूचिरिन्दोस्तरूणीनां प्राचीकरदर्पणायमानस्य |
मनसोऽन्यत्किमपि पदं प्राचीकरदर्पणायमानस्य || 29 || द्वि . च . पा . य

वीक्ष्य विधुं प्रेम हरिः प्राभृत मतिमानितं समुद्राङ्कम् |
दर्शितमिव रासमहे प्राभृतमतिमानितं समुद्राङ्कम् || 30 || द्वि . च . पा . य

कुर्वन् निधिं तमो विधुरास रसानां निशामनेनास्ताम् ।
मेने तु सुखेन हरी रासरसानां निशामनेनास्ताम् ।। 31 ।। द्वि . च . पा . य

उदितश्शशभृदकल्पत नभोगजे चामरत्वाय ।
सति यस्य रसेऽस्पृहयन्न भोगजे चामरत्वाय ।। 32 ।। द्वि . च . पा . य

तमुदीक्ष्य येन शकिता परा भवाकल्पता गन्तुम् ।
घ्नन्त्यरतिं कुमुदिन्यपपराभवाऽकल्पताऽऽगन्तुम् ।। 33 ।। द्वि . च . पा . य

रमयदविशद्गिरिदरीरपयाय तमोदितं च कोर्यातु ।
पतिपीतशिष्टशशिरूचिरपयात मोदितं चकार्या तु ।। 34 ।। द्वि . च . पा . य

व्यषदद्रविगृह्येन्दोस्सा कमलिन्याहता पादैः ।
कुमुदिन्यतिमुमुदे तैस्साकमलिन्या ह तापादैः ।। 35 ।। द्वि . च . पा . य

वीक्ष्य मृगलक्ष्मलक्ष्मीं वै भावरसं गतानि गोपीनाम् ।
कृष्णोऽथ मनसि चक्रे वैभावरसङ्गतानि गोपीनाम् ।। 36 ।। द्वि . च . पा . य

हर्ष किलैष रासं पुरा तनोतीत्यदुरितानि ।
इन्दुमहांस्यरमत च स पुरातनोऽतीत्य दुरितानि ।। 37 ।। द्वि . च . पा . य

वीक्ष्योज्ज्वलां कुमुदिनीमुत्कालिं द्यामहो दारान् ।
सस्मार सैकते धृतमुत्कालिन्द्या महोदारान् ।। 38 ।। द्वि . च . पा . य

प्रजगौ गोपीः कृष्णो रासं नेताऽनिता नियतः ।
देशे मनांसि संययुरासन्ने तानि तानि यतः ।। 39 ।। द्वि . च . पा . य

रसमधित स गीतध्वनिसुधामयं श्रुतिषु धात्रीषु ।
विदुरिह निहितं परमं सुधाम यं श्रुतिषु धात्रीषु ।। 40 ।। द्वि . च . पा . य

मदयन् समहद्रासोत्सवेऽणु नादासवं नयन्नमितम् ।
गन्धर्वसदो नमयत् स वेणुना दासवन्न यन्नमितम् ।। 41 ।। द्वि . च . पा . य

शोभां समुपरतपतद्रुतोपलम्भं दधानमेकां तम् ।
उद्देशमकृत गीत्या द्रुतोपलं भन्दधानमेकान्तम् ।। **42** ।। द्वि . च . पा . य

तच्छृण्वन् कोऽतिष्ठन्नीरति वै श्वा नरो भोगी ।
दुर्वा येन स्माग्हो नीरति वैश्वानरो भोगी ।। **43** ।। द्वि . च . पा . य

वव्रे स्त्रीभिर्गीत्या समं ततो नीयमानाभिः ।
त्यक्तगृहाभिर्विघ्नैस्समन्ततोऽनीयमानाभिः ।। **44** ।। द्वि . च . पा . य

त्वरयाऽऽप काऽप्यभि मनो व्यवधानं सङ्गमायतया।
सेहे न गमनकाल्व्यवधानं सङ्गमाय तया ।। **45** ।। द्वि . च . पा . य

श्रुत्वाऽन्या तत् क्षणमिव चित्रावस्थापिताङ्गलता ।
आस्तासुखेन वव्रे चित्राऽवस्थाऽपि तां गलता ।। **46** ।। द्वि . च . पा . य

समियाय विगणयन्त्या स नाभिजनमितरया समया ।
याऽभूत्तृणाय मत्वा सनाभिजनमितरया समया ।। **47** ।। द्वि . च . पा . य

अन्तर्गृहेऽपरां ह्रीमानत्रासादितो न्यस्ताम् ।
गीतिरकर्षद्भावोऽमानत्रासादितोऽन्यस्ताम् ।। **48** ।। द्वि . च . पा . य

गतिजवतोऽन्यस्या अपिनह्य वसितमवसितं वासः ।
तद्बन्धं न जनेऽवैन्न ह्यवसितमवसितं वा सः ।। **49** ।। द्वि . च . पा . य

ताममुचद्यात्यन्य स्वगमेखलयाऽनुसूच्यमानेहा ।
किं कुर्यादलिपङ्क्त्या स्वगमे खलया नु सूच्यमाने हा ।। **50** ।। द्वि . च . पा . य

अन्या दध्यौ भान्तं भ्रूकुटिलतया स्वनेऽत्र गेहे तम् ।
वेणुगपाणिमुखाब्जं भ्रूकुटिलतया स्वनेत्रगेहेतम् ।। **51** ।। द्वि . च . पा . य

चित्रं प्रेमान्धाऽन्या समवेदध्वानमहिमकरम् ।
कृष्णाख्यं यान्ती निधिसमवेदध्वानमहिमकरम् ।। **52** ।। द्वि . च . पा . य

सङ्गतिमिता स्म काऽपि तदनुगायति वल्लवी कृतां बुद्ध्वा ।
मुक्तान्यासक्त्यैव तदनुगा यतिवल्लवीकृताम्बुद्ध्यां ।। **53** ।। द्वि . च . पा . य

गीतिं निशम्य वीक्ष्य च निशां तया सन्निधावन्त्या ।
प्रापि हि दशा गुरोर्गतनिशान्तया सन्निधावन्त्या ।। **54** ।। द्वि . च . पा . य

सा तत्स्मृतितद्विरहजसुखदुःखास्तद्विरूपकृत्यार्या ।
मुमुचे ये विषयाश्श्रितसुखदुःखास्तद्विरूपकृत्याऽऽर्या ।। **55** ।। द्वि . च . पा . य

निखिलेनेष्टेन हरिस्सङ्गत्य जनेन निरवृत द्युतिमान् ।
यस्तद्धृदा कृतेतरसङ्गत्यजनेन निरवृतद्युतिमान् ।। **56** ।। द्वि . च . पा . य

आभी रेमेऽयमतिस्वयम्भुवीर्यो रहस्येयः ।
आभीरेऽमेयमतिस्स्वयं भुवीर्यो रहस्ये यः ।। **57** ।। समुद्गयमकम् .

।। इति श्रीमत्कूरत्ताल्वाननुगृहीत यमकरत्नाकारे त्रयोदशाश्वासः ।।

श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरः

अथ चतुर्दशाश्वासः

इत्थं कृष्णाख्यगजं सारं गवि लोकनाथमार वशा ।
एकमनेका गोपी सारङ्गविलोकनाऽथ मारवशा ।। **1** ।। द्वि . च . पा . य

विधिनाऽन्तरितो हरिरथ मुदा विलासाय केनापि ।
स्मारेण च धीस्तासामुदाविला सायकेनापि ।। **2** ।। द्वि . च . पा . य

विरहे तमन्वभूवन्ननुकरणेनाशया यत्ताः ।
दृष्टा इव यत्र रसा ननु करणेनाशयायत्ताः ॥ 3 ॥ द्वि . च . पा . य

कियया ऽन्वकारि युवतिभिरनन्यसञ्जीवनाभिरूद्धतया ।
यदपरथा प्रीत्यविरतिरनन्यसञ्जीव नाभिरूद्धतया ॥ 4 ॥ द्वि . च . पा . य

उदजीवत्तत्रैका महर्षभवधे ऽनुकरणेन ।
अन्या किलासुराणामहर्षभवधेनुकरणेन ॥ 5 ॥ द्वि . च . पा . य

अन्या चके कालियमस्तकलास्यानुकारेहाम् ।
वेणुक्वणने ऽन्या चिरमस्तकला ऽस्यानुका रेहाम् ॥ 6 ॥ द्वि . च . पा . य

यमलार्जुनौ तु चके दाधिकमोषं परा स्यन्ती ।
गिरिमधृतान्या स्वं सुखदा ऽधिकमोषं परास्यन्ती ॥ 7 ॥ द्वि . च . पा . य

कृष्णमपश्यंस्तु निजं धनं जयन्तं तमो घोरम् ।
स्त्रीणाममत निशि रसं धनञ्जयं तं तमोघो ऽरम् ॥ 8 ॥ द्वि . च . पा . य

ददृशुश्च तास्तमारादग्रे पश्चाददूरतस्स्वान्ते ।
स्वाङ्गेभ्यो मनसि रूजोदग्रे ऽपश्चाददूरतस्वान्ते ॥ 9 ॥ द्वि . च . पा . य

अर्थो ऽस्य को ऽपि भूमावस्तु समस्तं तमेवमन्यं ते ।
गोपीजनास्स्म दृष्टं वस्तु समस्तं तमेव मन्यन्ते ॥ 10 ॥ द्वि . च . पा . य

काप्यालिङ्ग्य कुसुमितामरमतसीमन्तिकासितत्वेन ।
मत्वा निवृत्तमच्युतमरमत सीमन्तिका ऽसितत्वेन ॥ 11 ॥ द्वि . च . पा . य

अन्या ऽमत विधिना किं नापरमे क्षिप्रमुदितेन ।
मनसा ऽन्यया हरिजुषा नापरमैक्षि प्रमुदितेन ॥ 12 ॥ द्वि . च . पा . य

परया ऽर्चिर्ज्वलतीन्दावितरदवे ऽदन्यदन्यापि ।
हरिगतधीर्न च दुःखं वितरदवेदन्यदन्या ऽपि ॥ 13 ॥ द्वि . च . पा . य

गमिता शशिमहसा द्रोरपराऽधस्तात्सदागतिना ।
अशपन्ममेव तु हरेरपराधस्तात्सदागतिना ।। 14 ।। द्वि . च . पा . य

अन्याऽन्तरितमशङ्कत मुद्देशममुं च तीरागात् ।
अपराऽतृपदमुनोषितमुद्देशममुञ्चती रागात् ।। 15 ।। द्वि . च . पा . य

काचिद्धौत्यं व्यसनादिन्द्राणीमति ययाचेऽतः ।
गर्वेण धृतमधोभवदिन्द्राणीमति यया चेतः ।। 16 ।। द्वि . च . पा . य

स्वात्मा सन्तप्तो नानिन्दीव रतो हिमे च कतमस्याः ।
या व्यलपत्क्व हरेऽस्मिन्निन्दीवरतो हि मेचकतम स्याः ।। 17 ।। द्वि . च . पा . य

हीनं मनोऽपरस्यास्समकुचदवधानतोऽनाशम् ।
अश्रुपयोधिरगादघटसमकुचदवधानतो नाशम् ।। 18 ।। द्वि . च . पा . य

न विलिल्ये हृदये हरिमाशासाने कयाचित्तम् ।
विधया क्षमा हि रक्षितुमाशा साऽनेकया चित्तम् ।। 19 ।। द्वि . च . पा . य

भ्रान्तेव हरिं वाचाऽगर्हत या सा शशंस बहुमतिका ।
गणयन्ती तं स्तुतिवगर्हतया साशशं सबहुमतिका ।। 20 ।। द्वि . च . पा . य

काऽप्यवदत्कुरुते हरिरङ्गारमयं चलक्षणं वर्षम् ।
ज्योत्स्नाव्याजेन च विधुरङ्गारमयं च लक्षणं वर्षम् ।। 21 ।। द्वि . च . पा . य

तप्तं कथमिव शीतं स्थाने विधुरोचिरात्तापम् ।
अहमिव भजेत हरिणा स्थाने विधुरोऽचिरात्तापम् ।। 22 ।। द्वि . च . पा . य

घननीला क्व तनुर्मयि मायामस्यामितस्य सा दृश्या ।
या प्राप्ता श्वासानामायामस्यामितस्य सादृश्या ।। 23 ।। द्वि . च . पा . य

तममत का॒प्यपि चलिते नगच्छदे कामदारसदृक् |
अन्वीक्ष्य वनोद्देशानगच्छदेका मदारसदृक् || 24 || द्वि . च . पा . य

अन्या परिताः पुष्पितसालाञ्छनकैरनूपेतम् |
व्यचिनुत पदमप्यैक्षत सा लाञ्छनकैरनूपेतम् || 25 || द्वि . च . पा . य

साऽन्यास्स्माहास्यां गवि पद्धतिमुपलभे दीनः |
तापोऽजनि लब्ध्वातोऽङ्गविपद्धतिमुपलभेदी नः || 26 || द्वि . च . पा . य

अनु तनुत तस्य वर्त्मन्यक्षि पदन्यासमेकान्ते |
धन्या यत्र स्वपदे न्यक्षिपदन्या समे कान्ते || 27 || द्वि . च . पा . य

नियतामपि तं कामपि मन्वे धयताक्षिपातेन |
यद्दुःखस्य कृता मुदमन्वेधयता क्षिपा तेन || 28 || द्वि . च . पा . य

हरिरिह किल कुसुमानामपचितिमुत्पादयामास |
तैश्चालङ्कृत्यैकामपचितिमुत्पादयमास || 29 || द्वि . च . पा . य

कृष्णश्शाखासु तरावधिरूढो वामनेऽत्रासु |
पुष्पाणि ववर्ष रसावधिरूढो वामनेत्रासु || 30 || द्वि . च . पा . य

स्त्रीसुग्रहतायै हरिपादानमितेव शाखेह |
समकम्पत या पुष्पेऽपादानमितेऽवशा खे ह || 31 || द्वि . च . पा . य

काऽप्यरतिदाऽतिहर्षिण्यत्रापाऽचेष्टताऽन्यस्याः |
स हि यानि प्रियपुष्पाण्यत्रापाचेष्ट तान्यस्याः || 32 || द्वि . च . पा . य

पुष्पचयो गोत्रच्छलरोष्तिया तत्यजेऽत्रायम् |
साऽदमि शरं स्मरेण निरोषितयाऽऽतत्य जेत्रा यम् || 33 || द्वि . च . पा . य

हरिणेह हृद्यधिस्त्रि स्वच्छे दिननाथमानेन |
न कुसुमविटपाख्यं वस्वच्छेदि न नाथमानेन || 34 || द्वि . च . पा . य

तमवेत्य रूषा विटपकमस्वञ्जितया समधुमथ नः ।
निधिरवपदद्भियेव समस्वञ्जि तया स मधुमथनः ॥ 35 ॥ द्वि . च . पा . य

बहुमतिमिह तेन चया गुम्भाभिः कौसुमा नीताः ।
व्यभजदिहातीतास्सितगुं भाभिः कौ सुमानी ताः ॥ 36 ॥ द्वि . च . पा . य

नात्रैषास्याङ्कमगान्न केशवेशस्य माननया ।
चरितार्था हन्त कथं न केशवे शस्यमाननया ॥ 37 ॥ द्वि . च . पा . य

कृष्णाद् बुद्ध्वा स्वस्मिन्नियमागोऽत्रापरा धनतः ।
विनिवृत्तपदा स्फुटमनुनियमा गोत्रापराधनतः ॥ 38 ॥ द्वि . च . पा . य

खेदस्य हृदि तदर्पितमालापेतस्य कोपघ्ने ।
स्थितिरस्या या शममैदालापे तस्य कोपघ्ने ॥ 39 ॥ द्वि . च . पा . य

स्पृशतामरतेः कृष्णसंस्तरणे सूचितस्स्वङ्गः ।
कीडंस्त्रियेह पौष्पे संस्तरणे सूचितस्वङ्गः ॥ 40 ॥ द्वि . च . पा . य

हरिणा स्त्रीभियुद्धं सूनासूनीहमानेन ।
रतिविघ्नाहान्यकृषत सूनासूनीह मानेन ॥ 41 ॥ द्वि . च . पा . य

कृष्णास्माकमसत्यव्रत तीव्र ततीरहो भित्वा ।
क्वास्यरमयदिह धन्या व्रतती व्रतती रहोभित्वा ॥ 42 ॥ द्वि . च . पा . य

अस्या निषेवेणेऽस्मत्सार्थजनास्था वरावन्याः ।
तव चरणजुषो यस्यां सार्थजनास्स्थावरा वन्याः ॥ 43 ॥ द्वि . च . पा . य

भुवमेत्य तस्य किमु रतिमधुरेणसमा दृशाऽमर्यः ।
यन्नादरमकृताक्ष्णा मधुरेण स मादृशामर्यः ॥ 44 ॥ द्वि . च . पा . य

इति तासां भावोऽजनि स स पर्यालोचनान्यायात् ।
कुर्वन्नथ कृष्णस्तास्ससपर्या लोचनान्यायात् ।। **45** ।। द्वि . च . पा . य

न्यवृतद्युवतिजनोऽस्मादमर्षयोगर्धमध्वरतः ।
यत्पदयोरधुरारादमर्षयो गर्धमध्वरतः ।। **46** ।। द्वि . च . पा . य

रूडशमि तासां हरिणा सुरोषदमलब्धवर्णेन ।
सर्वा श्रियं तमभितोऽसुरोषदमलब्ध वर्णेन ।। **47** ।। द्वि . च . पा . य

एकाऽमुना प्रयुक्ते वचसा सामन्यथाकारम् ।
स्वमभजदग्रे दीप्तेव च साऽऽसामन्यथाकारम् ।। **48** ।। द्वि . च . पा . य

कृष्णेऽन्यस्याः कोपव्यालोऽकितवेगतो देहे ।
स्वस्मिंस्तु तत्कटाक्षव्यालोकितवेगतो देहे ।। **49** ।। द्वि . च . पा . य

अकृत धियोऽन्यस्याः कृतपरिरम्भायास्समाधानम् ।
मानस्यान्याभ्यो योपरि रम्भायास्समा धानम् ।। **50** ।। द्वि . च . पा . य

बह्वीं शोकेन स्त्रीं स्वामृश्यसदीक्षितां तान्ताम् ।
अकृत करेण क्रीडास्वामृश्य स दीक्षितां तां ताम् ।। **51** ।। द्वि . च . पा . य

चरितैस्तासां हृदि शं स स्वजिरे मानवत्यस्तम् ।
यैर्गतरूषोऽनय्कूलास्सस्वजिरे मानवत्यस्तम् ।। **52** ।। द्वि . च . पा . य

रसवीचिषु हृदि तासामतिरेकादर्प्यमाणासु ।
सर्वास्वासीन्नर्मणि मतिरेका दर्प्यमाणासु ।। **53** ।। द्वि . च . पा . य

कर्मभिरूदयूयुज दथ रासे वामा हि ता माद्यान् ।
सापत्न्ये सदुपायैरासेवामाहितामाद्यान् ।। **54** ।। द्वि . च . पा . य

स्पृष्टकरमीषुरखिला मुरसादयितारमाशयाऽनन्तम् ।
रमयति निकेतनेन यमुरसा दयिता रमा शयानं तम् ।। **55** ।। द्वि . च . पा . य

रासवलये रसानां श्रियो गृही त्वाकरे स हि ताः ।
निन्ये स्वयं स्फुटमुखश्रियो गृहीत्वा करे सहिताः ।। 56 ।। द्वि . च . पा . य

तासु कृतरासशोभाधरबिम्बास्वादरागतया ।
समभावि कयापि धृताधरबिम्बास्वादरगतया ।। 57 ।। द्वि . च . पा . य

लयगेन रासनृत्तं तन्वानास्वङ्गहारेण ।
चेलेऽलङ्कारेण नु तन्वा नास्वङ्ग हारेण ।। 58 ।। द्वि . च . पा . य

रासे सर्वा बहुरसदे कमनी भूयसा मान्या ।
एकमिव नृत्तमकरोदेकमनीभूय सामान्या ।। 59 ।। द्वि . च . पा . य

रासे तासां नूपुरताला लयतामिता हि तरसेह ।
यत्रहृष्यत हरिणा ता लालयताऽमिताहितरसे ह ।। 60 ।। द्वि . च . पा . य

अनुलोमप्रतिलोमजगमनागमनायतायासा ।
एकाऽश्लिक्षद्रागमनागमना यतायासा ।। 61 ।। द्वि . च . पा . य

श्रमतोऽन्यया किल हरेर्मनोज्ञया योषिता तु हृद्यस्य।
हस्तो न्यस्तस्कन्धेऽमनोज्ञया योषिता तु हृद्यस्य ।। 62 ।। द्वि . च . पा . य

नाश्राम्यत्सुखमच्युतगानेनान्या यतो व्यापत् ।
पीत्वाऽक्ष्णाऽन्या तं सुखगाऽनेनान्यतो व्यापत् ।। 63 ।। द्वि . च . पा . य

सक्ताः कृष्णाख्ये रसजगिरेता मधुनिहन्तारम् ।
गोप्यः पुनः पुनर्व्यतिजगिरे ता मधुनिहन्तारम् ।। 64 ।। द्वि . च . पा . य

लास्यच्छलविवृताङ्गी का चित्तस्थे बलानुजायासु ।
न विकृतवती रतिरसे का चित्तस्थेऽबला नु जायसु ।। 65 ।। द्वि . च . पा . य

सोऽन्तर्याम्यकरोत्ता निरन्तरायास्स्वलीलासु ।
अतवीष्वभजत रतिरसनिरन्तरास्स्वलीलासु ।। **66** ।। द्वि . च . पा . य

तत्पतिषु तताऽस्य स्वा प्रतिमोहन्यादिमायाऽतः ।
यदपरधेष्टं विघ्नोऽप्रतिमो हन्यादिमा यातः ।। **67** ।। द्वि . च . पा . य

गोपीष्वथ मानितरतिरिष्टासु रहःकृताशंसः ।
आसीत्क्रीडन् कृष्णोऽरिष्टासुरहः कृताशंसः ।। **68** ।। द्वि . च . पा . य

क्वचन प्रदोष उन्नतके शीते नव्यभेऽद्य श्वः ।
जहि हरिमिति कंसोक्तः केशी तेन व्यभेद्यश्वः ।। **69** ।। द्वि . च . पा . य

सोऽश्मः प्रकम्पयन् जगदिदङ्क्षयादनु जवाज्ज्यायान् ।
आस्यगतद्भुजभिन्नो दिदङ्क्षया दनुजवाज्ज्यायान् ।। **70** ।। द्वि . च . पा . य

सततश्चक्रीदायामकमतो घ्नन्नरातिमतः ।
स ततश्च क्रीदायामकमतोघ्नन्नरातिमतः ।। **71** ।। समुद्गयमकम्

।। इति श्रीमत्कूरत्ताल्वाननुगृहीत यमकरत्नाकरे चतुर्दशाश्वासः ।।

श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरः

अथ पञ्चदशाश्वासः

कंसश्श्रुत्वाऽऽत्मीयं नारदवाचाऽहसीदन्तम् ।
स च मनसाऽऽत्मानं बत नारादवाचा ह सीदन्तम् ।। **1** ।। द्वि . च . पा . य

सोऽक्रूरं रहसीदं व्यथयावददाहवेऽपि धीरतरम् ।
नारिबलं भविता भुव्यथ यावददाहवेपिधीरतरम् ।। **2** ।। द्वि . च . पा . य

नारद इदमश्रौषं परममुनावञ्चितालोके ।
वसुदेवेनात्र वयं परममुना वञ्चिता लोके ।। 3 ।। द्वि . च . पा . य

स्माह स वसुदेवेन तु सख्याऽपि तवानघात्यन्तम् ।
निकृतं नु सुतं हि हरिं स ख्यापितवानघात्यं तम् ।। 4 ।। द्वि . च . पा . य

जनितुं मधुरिपुरार्तैरमृताशनकैस्स्तुतोऽकमिता ।
तं मत्स्वसा हि शस्त्रैरमृता शनकैस्तु तोकमिता ।। 5 ।। द्वि . च . पा . य

दुर्गाख्या तु मयि हरेरमतावसुदे वरा माया ।
दत्ता तया मम मतेरमता वसुदेवरामा या ।। 6 ।। द्वि . च . पा . य

कालेन स्वसृगर्भं नष्टममन्यामहीयतेतेन ।
तं लब्ध्वा लोकेऽस्मिन्नष्टममन्या महीयते तेन ।। 7 ।। द्वि . च . पा . य

कुर्वन् शेषश्चाजनि साहायकमस्यतोऽकमितरागात् ।
वसुदेवात्किल भार्या सा हा यकमस्य तोकमितराऽगात् ।। 8 ।। द्वि . च . पा . य

एतत्सुतौ व्रजे किल वसतस्संप्रत्यये पुरो नीतौ ।
हन्मि गतौ गोपांस्तावसतस्संप्रत्यये पुरो नीतौ ।। 9 ।। द्वि . च . पा . य

कृष्णाय स्पृहयद्भिर्गोपायायामि हैहन्त ।
मृत्युं गोपैर्ये तद्गोपायायामिहैहन्त ।। 10 ।। द्वि . च . पा . य

हन्त मया भोगाः किल केश्यन्तामरणेन मा यातः ।
व्रीलो यदहसत तयोः केश्यन्ता मम रणेन मायातः ।। 11 ।। द्वि . च . पा . य

त्वं गत्वा श्रीः कांसे कोदण्डमहे तु कमनीति ।
तावान्यात्र कुर्यात्को दण्डमहेतुकमनीति ।। 12 ।। द्वि . च . पा . य

आहुश्च हरिबलाभ्यां मल्लयमाभ्यां ह तावेतौ ।
इह करवाणि तु मामकमल्लयमाभ्यां हतावेतौ ।। 13 ।। द्वि . च . पा . य

चाणूरमुष्टिकयुतो भूयान्मल्लोऽपरो धनायातः ।
मयिा वसति तयोर्दमनं भूयात् मल्लोपरोधनायातः।।14 ।। द्वि . च . पा . य

इत्युक्तः प्रास्थित स स्यन्दनवान् योजनान्तरिते ।
घोषे हरौ तु भक्तिस्यन्दनवान् यो जनान्तरिते ।। 15 ।। द्वि . च . पा . य

शोऽध्यैद्विदुरिह येन तु मातङ्गं तारितमनन्तम् ।
द्रष्टुं हरिं यशोदामातं गन्ताऽरितमनं तम् ।। 16 ।। द्वि . च . पा . य

संद्रक्ष्यतां हरिमहो क्षणदेयं सुप्रभाता नः ।
मन्येत स स्वमक्षि नु क्षणदेयं सुप्रभातानः ।। 17 ।। द्वि . च . पा . य

हरिवन्दनं फलं बत मज्जन्मन्येतदासन्नम् ।
कुर्वे श्रमं हरिजले मज्जन् मन्य तदा सन्नम् ।। 18 ।। द्वि . च . पा . य

योऽध्यस्त पदं जगतस्साक्षी यतचेतनैराश्यम् ।
तं मम यतो ह्यलक्ष्मीस्साऽक्षीयत चेतनैराश्यम् ।। 19 ।। द्वि . च . पा . य

तमभि गतिः क्वाघस्य तु जननेऽत्रमयालयोयदीये न।
तनुमधुना मत्ता व्रजजननेत्रमयालयो यदीयेन ।।20 ।। द्वि . च . पा . य

लप्स्ये कृष्णात्कृतजगदुत्पत्त्यवनक्षयादिष्टम् ।
ययुरसुरगवा यस्मादुत्पत्य वनक्षया दिष्टम् ।। 21 ।। द्वि . च . पा . य

धन्योऽस्मि योऽधि कृष्णे संवर्तेऽसौ करीहितासाद्ये।
काले यस्य तनुरभूत्संवर्ते सौकरी हिता साऽद्ये ।।22 ।। द्वि . च . पा . य

सोऽक्रूरेति स्वगिरा वक्ष्यति मा धुर्यमुत्सवद्युतितः ।
पास्यति यस्य मम हरावक्ष्यतिमाधुर्यमुत्सवद्युतितः।।23 ।। द्वि . च . पा . य

तत्सविधे स्याद्यदि मे परपक्षक्षयविधूयमानत्वम् ।
तर्हि परं मम सहसाऽपरक्षक्षयविधूयमानत्वम् ।। **24** ।। द्वि . च . पा . य

विद्यान्न न स्थितं श्रुतिवप्रे माऽनागसं बुद्ध्या ।
आगच्छन् हि न चासावप्रेमा नागसंबुद्ध्या ।। **25** ।। द्वि . च . पा . य

तत्प्राज्ञोऽनागसि मयि वेदानामयमुदाहार्यम् ।
यस्स्म युगादौ राशिं वेदानामयमुदाहायम् ।। **26** ।। द्वि . च . पा . य

अधि हरिभक्त्या समुदितनन्दजनत्याजितां हास्याम्।
प्राप्तो दशामहमथो नन्दजनत्या जितांहा स्याम्।।**27** ।। द्वि . च . पा . य

इति चिन्तयन् स हृदये सदा महस्तं निजे तारम्।
गत्वैक्षतासुराणां सदाामहस्तं निजेतारम् ।। **28** ।। द्वि . च . पा . य

तं पश्यन्तोऽस्य समभून्नवरोमाञ्चा तनुन्नमतः ।
रमयति यो नित्यं क्षमां न वरो मामतनुन्न मतः।।**29** ।। द्वि . च . पा . य

बहिरपि तं स्म हरिरसौ स्वजतेऽजोऽन्तर्हि तस्य सङ्गमितः ।
मुदमधित दृढाश्लेषात्स्वजतेजोऽन्तर्हितस्य सङ्गमितः ।। **30** ।। द्वि. च. पा. य

अञ्चनमस्य हरिबलौ समञ्चितावञ्चनीयस्य ।
चक्रतुरस्य मुदाभ्यां समं चिताऽवञ्चनीयस्य ।। **31** ।। द्वि . च . पा . य

हे वरदाह्वानं तेऽवादीदपदिष्टहेतिमहः ।
कंसोऽत्र सतां किल योऽवादीदपदिष्टहेति महः।। **32** ।। द्वि . च . पा . य

इच्छति तं समयं प्रियमल्लाभ यदाऽस्तयोर्भवतोः ।
हृष्येत्स्वयं यदा किलमल्ला भयदास्तयोर्भवतोः ।। **33** ।। द्वि . च . पा . य

अमरगणस्त्वास्तौदितभवदस्राब्जचतुराननामरराजः ।
तेनावतीर्य भूमिं भवदस्राब्ज चतुराननामरराजः ।। **34** ।। द्वि . च . पा . य

सति खल्वृद्धिश्चलिता सौपर्वण्यस्य तायने नाथ।
अस्मिंस्त्वयैनमित्याऽसौ पर्वण्यस्यताऽयनेनाथ ।। **35** ।। द्वि . च . पा . य

इत्युक्तोऽरेः स कृतिं संप्रत्यज्ञास्त निष्ठायाः ।
यस्य प्रजा नरत्वे संप्रत्यज्ञास्तनिष्ठा याः ।।**36**।। द्वि . च . पा . य

या धीस्सुखं हरिगमोत्सवि भुञ्जानाऽनया सुहितः।
अक्रूर उषामनयत्स विभुं जानानया सुहितः ।।**37**।। द्वि . च . पा . य

हरि सुखदा व्युष्टा सह सा रात्रिदशाऽऽधिनाऽथ मेदिन्याः।
अजिगमिषत्स धियस्त्वनुसारात्रिदशाधिनाथमेदिन्याः ।।**38**।। द्वि . च . पा . य

स ययौ तौ कंसवधे रथमारोप्याशया धीरः ।
तद्विरहेत्वदहत् स्त्रीरथ मारोऽप्याशयाधीरः ।। **39**।। द्वि . च . पा . य

निष्कामति तस्मिंस्ता विलेपुरेकान्तमभ्यस्य ।
स्युः के नु सुखं हर्षाविले पुरे कान्तमभ्यस्य ।।**40**।। द्वि . च . पा . य

गमयन् हरिमनुकूलो हन्ताक्रूरो न नारीणाम् ।
सदृशो नो निधिहा खलु हन्ता क्रूरो न नारीणाम्।।**41**।। द्वि . च . पा . य

हन्त विधिर्नयति हरिं नयनानामफलतां प्रतन्वानः ।
कृतमृद्ध्या मनसां स्थिरनयनानामफलतां प्रतन्वा नः।।**42**।। द्वि . च . पा . य

किं कंसेन कृतेयं रहो विधाऽत्रामहा न न यः ।
अथवा कृतोऽयमनवधिरहो विधात्रा महाननयः ।।**43**।। द्वि . च . पा . य

अक्रूर क्रूरं स्फुटममुष्य तव सूचितं चेतः ।
येन त्वयाच्युताह्वयममुष्यत वसूचितं चेतः ।।**44**।। द्वि . च . पा . य

स्नेहमविद्वानसि किं वद यस्त्वमिते नवेऽगेन ।
सदृशे रथे नयसि तावदयस्त्वमितेन वेगेन ।।**45**।। द्वि. च. पा. य

कृष्णगते त्वयि न निशा व्युच्छेद्यामैरयस्सुखरैः ।
निशि निशि गिरं पदैर्न व्युच्छेद्यामैरयस्सुखरैः ।।**46**।। द्वि. च. पा. य

कथमिन्दीवरसदृशं विना शयिष्यामहे निशि तम् ।
अनलं प्रविश्य देहं विनाशयिष्यामहे निशितम् ।।**47**।। द्वि. च. पा. य

कंसस्य दुरालोकस्स मनागरिकायदावस्तात् ।
मञ्चे द्रक्ष्यन्ति तटित्समनागरिका यदा वस्तात् ।।**48**।। द्वि. च. पा. य

नागर्यो यान्तमिमं धास्यन्ति नुता दृशा यथा कामम् ।
दशयाऽङ्गे रोमाञ्छं धास्यन्ति नु तादृशा यथाकाम् ।।**49**।। द्वि. च. पा. य

मधुरां याति हरिर्भूस्सा धन्या माधुरी हातः ।
तस्यां स्त्रियो वृषं वृषनाथन्यामाधुरीहातः ।।**50**।। द्वि. च. पा. य

गच्छति जनार्दनोऽस्मान् नद्धवाऽसौ हि त्यजन् येन ।
स सुखेनायमशं घ्नन्नद्धवा सौहित्यजन्येन ।।**51**।। द्वि. च. पा. य

धन्यास्ते याति हरिर्यानध्वनि तोयदाभोऽगान् ।
त्रप्स्यन्ति मृगास्समीयुर्यानध्वन्तो यदा भोगान् ।।**52**।। द्वि. च. पा. य

दूरे स एव लक्ष्यो न रजो दृश्येतदृश्यदृशाम् ।
तदभिगतौ घोषो नो नरजो दृश्येत दृश्यदृशाम् ।।**53**।। द्वि. च. पा. य

इति विलपन्तीषु ययौ विरहादयि तासु सह तेन ।
यासु विरहं मुरारिर्विरहा दयितासु सहते न ।।**54**।। द्वि. च. पा. य

अक्रूरः प्रेक्ष्यापस्सतीरमितयो रथापगामीशम् ।
दध्यौ विगाह्य यमुनां स तीरमितयोरथऽऽपगामीशम् ।।**55**।। द्वि. च. पा. य

सोऽन्तरपां हरिमीक्ष्यं ददर्श गोपाकृतावर्हः ।
हृष्टश्च शशीवावृधददर्शगोऽपाकृतावर्हः ।।**56**।। द्वि. च. पा. य

तन्वन्तरगतिरियं स्वं परिहसता सङ्गतो यया वेषः ।
विवृतस्तां तनुमेत्योपरि ह सता सङ्गतो ययावेषः ।।**57**।। द्वि. च. पा. य

अनुपुरि हित्वाऽक्रूरं गौरवतो भाविकार्यस्य ।
ययतुः पुरीं रतेत्या गौरवतो भाविकाऽर्यस्य ।।**58**।। द्वि. च. पा. य

यो रजकः किल कंसे सगौरवस्त्रासिताम्बरावनि तम् ।
ययतुर्हत्वाऽनुसृतिं सगौरवस्त्रासिताम्बरावनितम् ।।**59**।। द्वि. च. पा. य

अथ ददृशुश्च जनास्तं श्रितमालाकारधामानम् ।
दधतं मुखमम्भोजश्रि तमालाकारधामानम् ।।**60**।। द्वि. च. पा. य

मालाकारे हर्षजसदास्रजातं स भाजितवान् ।
अथ सोऽप्यवशः प्रणमन् सदा स्रजा तं सभाजितवान्।।**61**।। द्वि. च. पा. य

ताभ्यां योग्यान्यलिनामाल्यानीतानि परमसौभाग्यम् ।
प्रददौ श्रितस्सुगन्धं माल्यानीतानि परमसौ भाग्यम् ।।**62**।। द्वि. च. पा. य

भूयो भूयः प्रणमन्ननुनीत्या केशवेशान्ते ।
अधित स्रजस्स भक्तो ननु नीत्या केशवे शान्ते ।।**63**।। द्वि. च. पा. य

अदित स तस्मै लोकान् समोक्षमिष्टान्यदागोपि ।
यच्च प्रथितमघं पितृसमोऽक्षमिष्टान्यदागोऽपि ।।**64**।। द्वि. च. पा. य

स्वपदाब्जैरकृषतां यां तौ रथ्यामिताघोषाम् ।
तां तौ वीक्ष्य च सोऽस्थाद्यान्तौ रथ्यमिताघोषाम् ।।**65**।। द्वि. च. पा. य

अनुभूषितौ प्रभान्तावाप्तौ मधुरां समाञ्चतामुत्कौ ।
अनुभूषितौ प्रभान्तावाप्तौ मधुरां समाञ्चतामुत्कौ ॥ 66 ॥ समुद्गयमकम्

॥ इति पञ्चदशाश्वासः ॥

श्रीमत्कूरत्ताल्वान् प्रणीत यमकरत्नाकरः

अथ षोडशाश्वासः

अथ कुब्जामैक्षेतां गच्छन्तौ साराराजमार्गेण ।
वीक्ष्य दधती मनो द्रागच्छन्तौ सा रराजा मार्गेण ॥ 1 ॥ द्विचतुर्थपादयमकम्

कुब्जां समवदद्दुरुमुखभा जननयनामृतायमानवसुः ।
स्पृहयन् कृतानुलेपनभाजननयनां ऋतायमानवसुः ॥ 2 ॥ द्वि च पा य

अनुलेपोऽयं कस्मै सत्यगिरोपवद तावद्यम् ।
स्निह्यन्ती स्वेन रसं सत्यगिरोऽपवदताऽवद्यम् ॥ 3 ॥ द्वि च पा य

वाचमिमां सा सार्थकजननोदीरितवती विदग्धतमाः ।
हरिदृग्रुचिवीची स्त्रीजननोदीरितवती विदग्धतमाः ॥ 4 ॥ द्वि च पा य

वेत्सि न किं कंसस्य स्वा भद्रा गन्धकारिणी नाथ ।
जाताऽहं त्वद्दृष्ट्या स्वाभ द्रागन्धकारिणी नाथ ॥ 5 ॥ द्वि च पा य

विषयोऽस्तु तव स्वामिन्ननुलेपनमक्षिपातस्य ।
योग्यं वां चेदुचिता ननु लेपनमक्षिपा तस्य ॥ 6 ॥ द्वि च पा य

स तया गमितस्तेन तु पतलतान्यासमक्षमिता ।
द्विषतामतोऽस्य तरुवत्पतलतान्या समक्षमिता ॥ 7 ॥ द्वि च पा य

कृष्णो निधिरस्यास्स्थगु स ममार्ज वराजितांशूनाम् ।
कुर्वन् हस्तेनैनां सममार्जवराजितां शूनाम् ॥ 8 ॥ द्वि च पा य

श्रीरिन्दुश्रीरिव हृतशशा ककुब्जातमुत्काशम् ।
चक्रे यस्य न हातुं शशाक कुब्जा तमुत्का शम् ॥ 9 ॥ द्वि च पा य

कृष्णाख्यमेत्य सा पूर्नष्टापदभूच्च भास्वन्तम् ।
अधिपमवन्तं लोकानष्टापदभूच्चभा स्वं तम् ॥ 10 ॥ द्वि च पा य

नागर्यः प्रहितेक्षणभृङ्गा राजीववदनं तम् ।
अरजन्त पुलकितस्तनभृङ्गारा जीववदनन्तम् ॥ 11 ॥ द्वि च पा य

ता वीक्ष्य श्रुतिजालकविवरं तदाऽस्य घनरसजैः ।
नर्मभिरतृपन् वृतमपि जालकविवरं तदास्यघनरसजैः ॥ 12 ॥ द्वि च पा य

उदतंसयत स्पन्दे गवाक्षमालाऽलसा युवतीः ।
हरिमभि तमो निहन्तुं गवा क्षमा लालसा युवतीः ॥ 13 ॥ द्वि च पा य

वदनाब्जैर्दृग्भ्रमरैर्वातायनवापिकाऽलसत्तासाम् ।
इष्टाऽभूत्तदृष्टवातायनवापिकालसत्ताऽऽसाम् ॥ 14 ॥ द्वि च पा य

काऽगच्छत्स्वजनात् परि सरसा स्रस्तनीवि वशा ।
अन्याऽऽनन्दादाप्लुतपरिसरसास्रस्तनी विवशा ॥ 15 ॥ द्वि च पा य

हरिणाऽन्यस्या दृक्छ्रीरपाङ्गवाहितरसाधारा ।
आनन्दजाऽऽप्यत दृशोरपां गवा हि तरसा धारा ॥ 16 ॥ द्वि च पा य

वीक्ष्यान्याऽस्थादिगलितवलयोभयदोर्जितात्मभूमानम् ।
यं पति मनोरथशतावलयोऽभयदोर्जितात्मभूमानम् ॥17 ॥ द्वि च पा य

पौष्पं किरन् परस्या वेणीबन्धो रजश्श्लेयः ।
व्यगलदतेर्दृशोऽसावेणीबन्धोरजश्श्लेयः ॥18॥ द्वि च पा य

उन्मत्तैका सुभूरतिमत्ताऽन्याऽपराऽमाद्यत् ।
अक्षाणि सकृष्णादितरतिमत्तान्याप रामाद्यत् ॥19॥ द्वि च पा य

अथ तौ शृण्वन्तौ सुखभवनगवीरायुधालयं समितौ ।
ताभ्यामथ ययुरायुधभवनगवीरा युधा लयं समितौ ॥20॥ द्वि च पा य

अथ गन्धमाल्यभूषितमिष्वासं सज्ज्यमानमयन् ।
स बभज्जासन्नोत्सवमिष्वा संसज्ज्यमानमयन् ॥21॥ द्वि च पा य

कंसो भग्नं श्रुत्वा धन्व धनज्जयविदाऽऽहवतः ।
मनसो रजमभजन्कुद्धन्वधनज्जयविदाहवतः ॥22॥ द्वि च पा य

कथमप्यलं गमयितुं शार्वरसमयं समासमं कंसः ।
क्रोधमगतो विडम्बितशार्वरसमयं समासमं कं सः ॥23॥ द्वि च पा य

उषसि च युधि माललं बलमसज्जयदनीतिमल्लपति ।
वचनमपि स्म विगर्हितमसज्जयदनीतिमल्लपति ॥24॥ द्वि च पा य

रङ्गस्थापितमल्लस्स मञ्चमध्यास्त दारुणोद्योगः ।
मञ्चान् परिते भूपास्समं च मध्यास्तदाऽरुणो द्योगः ॥25॥ द्वि च पा य

रङ्गदारिण्ययुजन्मतङ्गजं कुवलयापीडम् ।
अपि जेतुमलं दिश्यं मतं गजं कुवलयापीडम् ॥26॥ द्वि च पा य

जाते वयांसि तैमिरपटहान्याऽहन्यमानानि ।
पतिनेदुरितानि पुरः पटहान्याहन्यमानानि ॥27 ॥ द्वि च पा य

हरिणाऽपि तत तस्यां पत्यूषे सुरजनौ घनाभिरति ।
बुबुधे च स्त्राऽऽदित्यं पत्यूषे सुरजनौघनाभिरति ॥28 ॥ द्वि च पा य

कृतसान्ध्यविधिर्विकृतिं स नाथ यन्नागरमणीयः ।
बृहदपि पश्यन् रथ्यां सनाथयन् नागरमणीयः ॥29 ॥ द्वि च पा य

गच्छन् विहाय मान्द्यं सत्वरतां चेतनानाङ्गाम् ।
शृण्वन् स्वगुणप्रथनीं सत्वरतां चेतनानां गाम् ॥30 ॥ द्वि च पा य

पिञ्छापीडेन लसन् सदामयज्ञोपवीतेन ।
दुःखेन सतः पास्यन् सदामयज्ञोऽपवीतेन ॥ 31 ॥ द्वि च पा य

प्रययौ तृणयन् कंसं रङ्गदारि दमितासुरव्यूहम् ।
वीक्षय नृधीषु महो जितरङ्गदारितमितासु रव्यूहम् ॥ 32 ॥ द्वि च पा य

जङ्गमशिखरीवामितदम्भो दवपूरसन्निभोग्रगतः ।
रुंन्धन् दारि तमुद्भवदम्भोदवपू रसन्निभोऽग्रगतः ॥ 33 ॥ द्वि च पा य

अरतिः कृष्णं जगतां मा तं गमदेनमाद्यन्तम् ।
इति साधवो निदध्युर्मातङ्गमदेन माद्यन्म् ॥ 34 ॥ द्वि च पा य

चलितं तृणीकृतसृणिस्वरुचारुंधानमिव पुरस्सहसः ।
तमभिययौ पर्यन्तान् स्वरुचा रुन्धानमिव पुरस्सहसः ॥ 35 ॥ द्वि च पा य

स सलीलमाजघान तमारक्षे मन्दया वृत्त्या ।
यत्कर्तुमीश्वरो भुवमार क्षेमं दयावृत्त्या ॥ 36 ॥ द्वि च पा य

निरगात्पार्श्वेन विशन् प्रतिमानं तस्य परिणमतः ।
गजरोषस्य तु नाभूत्प्रतिमाऽनन्तस्य परिणमतः ॥ 37 ॥ द्वि च पा य

गर्जन् स गजः कृष्णोदन्ताभ्यान्तो दितं स्वयं तारम् ।
निपिपेष निपात्य तले दन्ताभ्यां तोदितं स्वयन्तारम् ॥ 38 ॥ द्वि च पा य

प्रक्रान्तरेण ततोदगे च रणान्तरेक्षणतः ।
अचरत्पार्श्वे पश्चादगे चरणान्तरे क्षणतः ॥ 39 ॥ द्वि च पा य

बलिनाऽपि तु प्रहर्ष विषाणिनोदस्यताऽनेन ।
नोत्सृष्टानि तदा मदविषाणि नोदस्य तानेन ॥ 40 ॥ द्वि च पा य

उपधावन्नपधावन् स कुञ्चयन् स्वतनुमुन्नयन्नयतः ।
तं व्यवशयदाकाशं सकुं च यन् स्वतनुमुन्न यन्न नतः ॥ 41 ॥ द्वि च पा य

कीडन् स जनेभ्यश्चिरमास्थित दक्षो दितस्य विभ्रमतः ।
वपुषोऽन्तः करिणो बलमास्थि तदक्षोदि तस्य विभ्रमतः ॥ 42 ॥ द्वि च पा य

अतिखेदितो भृशं स तु तध्वान मलं परासृजन्नयति ।
वान्तासृक्किं चारादध्वानमलं परासृजं नयति ॥ 43 ॥ द्वि च पा य

उदपाटयदुभयं तद्विषाणमुत्पत्य हस्ताभ्याम् ।
प्राप्तः क्षण इव हत्वा द्विषाणमुत्पत्यहस्ताभ्याम् ॥ 44 ॥ द्वि च पा य

निहतो भुवं स तन्वा पतितोऽतासयदपक्षतया ।
गिरिरिव भीतो नृन् सुरपतितोऽतासयदपक्षतया ॥ 45 ॥ द्वि च पा य

प्रविशीर्णमुक्तया पृथगुर्वी नक्षतमालया सितया ।
स्त्र्वे तस्य द्यौरिव गुर्वी नक्षतमालयाऽसितया ॥ 46 ॥ द्वि च पा य

कृपयाऽखिले स मृत्योस्तं बेरमदन्तमास जन्तौ तु ।
ययतुरथ रङ्गमंसे स्तम्बेरमदन्तमासजन्तौ तु ॥ 47 ॥ द्वि च पा य

अथ मल्लचमूरपरोक्षपापराशीयमानगुरुस्तनुका ।
ददृशे ताभ्यां तस्याः क्षपाऽपरा शीयमानगुरुस्त नु का ॥ 48 ॥ द्वि च पा य

सेनां तामभियातावभिया तावत्सरन्तीह ।
सेनान्तामभ्यियातावभि या तावत् सरन्ती ह ॥ 49 ॥ समुद्गयमकम्

कंसस्य दवमतिर्बलभदहृषीकेशशीतदेहदृशः ।
बभतुरिव जने द्विंतनुर्भदहृषीके शशी तदेह दृशः ॥ 50 ॥ द्वि च पा य

हरिचाणूरौ रसभागारेभाते नियुदमन्योन्यम् ।
वदनेऽशुमधुः क्रोधागारे भाते नियदमन्योऽन्यम् ॥ 51 ॥ द्वि च पा य

न तयोश्चिरं भुजाभुजि पदापदि च युद्ध्यमानयोरेकः ।
व्यरमन्न चाजनि क्षयपदापदि च युद्ध्यमानयो रेकः ॥ 52 ॥ द्वि च पा य

हरिरिहाः कंसस्य स्वपक्षयमनेऽधिताश्चर्याः ।
चाणूरस्तु ययौ तास्वपक्षयमनेधिताश्चर्याः ॥ 53 ॥ द्वि च पा य

कर्तुर्विष्टपविततावाद्यन्तदशाद्वयस्य जन्येन ।
व्रीलेन नृपो विरतिं वाद्यं तदशाद्वयस्यजन्येन ॥ 54 ॥ द्वि च पा य

पिंषति हरौ निषेबणसमयाच्चाणूरमायुक्ते ।
चूर्णीकृतस्स भूमिं समयाच्चाणू रमायुक्ते ॥ 55 ॥ द्वि च पा य

छित्वाङ्गं स्थेम्नाऽसावायसमशनैर्हली लयापेतम् ।
घ्नन् मुष्टिकमार्चन् बहु वायसमशनैर्ह लीलयाऽऽपे तम् ॥ 56 ॥ द्वि च पा य

अथ तेन लीलयैव तु कर्कशतमहारिमुष्टिकान्तकरेण ।
उल्लाप्य मल्लजीवितकर्कशतमहारि मुष्टिकान्तकरेण ॥ 57 ॥ द्वि च पा य

मल्लकुलमितरदाशा विप्रादुदवदतितसद्धुरितः ।
हर्षितसमस्तसुरमुनिविप्रादुदवदतितसद्धुरितः ॥ 58 ॥ द्वि च पा य

जगुरथ निजे तु लब्धे तौ सलयमनेनसोऽमरा जीवे ।
ननृतुश्च जयददनास्तौसलयमनेन सोमराजीवे ॥ 59 ॥ द्वि च पा य

इति मल्लगणं विपतिं विचक्रमातेनतू रूजा समितौ ।
सिंहाविव च सगर्वं विचक्रमाते न तूरूजासमितौ ॥ 60 ॥ द्वि च पा य

कंसस्सहरिं सखिभिस्सहस्तताडं बरं सह समेतम् ।
वीक्ष्य व्यथितोऽजल्पत्सहस्तताडम्बरं सहसमेतम् ॥ 61 ॥ द्वि च पा य

एतौ मयि मल्लाह्वयनिष्कासनतः कृतावमती ।
भवतां शिशू परोक्षं निष्कासनतः कृतावमती ॥ 62 ॥ द्वि च पा य

योयोऽस्य स ह हसन् सुहृदासीदासङ्गवान्नमस्यातः।
हर्तव्यं धनमखिलं दासीदासं गवान्नमस्यातः ॥ 63 ॥ द्वि च पा य

अपवरकभूष्वनीक्षितरवि कारायास्स्वसा धवश्चार्याः।
नेया निकृतिपरा बहिरविकारा यास्स्वसाधवश्चार्याः ॥ 64 ॥ द्वि च पा य

इति कंसोऽकृतजल्पैराज्ञां हन्तव्यतानियतः ।
ताभ्यामवमतिरग्रेराज्ञां हन्त व्यतानि यतः ॥ 65 ॥ द्वि च पा य

तस्य हरिर्जितमल्लसमाजग्राहोऽपरीक्षमाणस्य ।
उत्पत्य मञ्चकं कचमाजग्राहोपरीक्षमाणस्य ॥ 66 ॥ द्वि च पा य

यस्स्वस्मिन् द्रोहं क्षमां निपात्यगात्तस्यतस्तस्य ।
उपरि हरिर्न्यपतद्गां निपात्य गातस्य तस्तस्य ॥ 67 ॥ द्वि च पा य

इति पतितस्य पलायत विश्वा सेनाऽथ वेष्टमानस्य।
अनिवार्या प्रणयेन तु विश्वासेनाथवेष्टमानस्य ॥ 68 ॥ द्वि च पा य

हतमगे स चकर्ष च रङ्गं परितोऽद्य सवयसां हसताम् ।
प्रघसमधत च मधुरिपुरङ्गं परितोद्य स वयसां ह सताम् ॥ 69 ॥ द्वि च पा य

कंसहनं वीक्ष्य जनो मुमुदेऽतस्स्वप्सरस्सुकमलास्यम् ।
ब्रूमस्सुरेषु निकषाऽमुमुदेतस्स्वप्सरस्सु कमलास्यम् ॥ 70 ॥ द्वि च पा य

समवाद्यन्त च हर्षितसनाभि वाद्यान्यथाज्या यः ।
क्रीडन्नत्यकामत्स नाभिवाद्यान् यथाज्यायः ॥ 71 ॥ द्वि च पा य

पुत्रो मेऽंहसि किल सति सदेव कीदृश्यतोऽपगतः ।
स्मृत इति देवक्या यस्स देवकीदृश्यतोपगतः ॥ 72 ॥ द्वि च पा य

वर्षाण्यनवगग्रहगति जोषणमायन्तु सुजनानाम् ।
वर्षाण्यनवग्रहगतिजोषणमायं तु सुजनानाम् ॥ 73 ॥ समुद्गयमकम्

भवतादर्थ्यादूना धीराचारं समागता मे शम् ।
भवतादर्थ्याऽदूना धीरा चारं समा गता मेशम् ॥ 74 ॥ स य

जीवे महायनानि ह मायानाथेऽनियत्यवाक्प्रख्ये ।
जीवेम हायनानिह मायानाथे नियत्य वाक्प्रख्ये ॥ 75 ॥ स य

परमोऽक्षरो महीयान्नागाध्यासी स मे तु नरकान्तः ।
परमोक्षरो महीयां नागाध्यासी समेतु नरकान्तः ॥ 76 ॥ स य

इति श्रीहरितकुलतिलक श्रीराममिश्रसोमनुत्सूनोः
श्रीरङ्गराजदिव्याज्ञालब्ध श्रीपराशरापरनामधेयस्य
श्रीवत्साङ्कस्य कृतौ यमकरत्नाकरे षोडशाश्वासः ॥

APPENDIX II
BANDHAS

ज	ह	तं	प्रा	णै	रे	नँ	स	म	म	र्द	न	तो	ग्र	शृ	ङ्ग	रम्
स	ह	सा	प्रा	प्य	रे	षं	स	म	म	र्द	न	तो	ग्र	शृ	ङ्ग	रम्

DIAGRAM. No. 1. गोमूत्रिकाबन्धः

द्वे	व	श्री	व	र	प	र	गां
व	क्ष्या	मि	स्वा	मि	ता	ध्या	र
श्री	म	द्वा	स्य	श्रि	य	मु	प
व	क्ष्या	मि	स्वा	मि	ता	ध्या	र
र	ध्या	ता	मि	स्वा	मि	क्ष्या	व
प	मु	य	श्रि	स्य	द्वा	म	श्री
र	ध्या	ता	मि	स्वा	मि	क्ष्या	व
गां	र	प	र	व	श्री	व	द्वे

DIAGRAM No. 2. अर्धभ्रमकबन्धः



DIAGRAM NO 3. मुरजबन्धः



DIAGRAM NO 4. मुरजबन्धः



DIAGRAM No. 5. चक्रबन्धः



DIAGRAM. No. 6. चक्रबन्धः



DIAGRAM. No.7. चक्रबन्धः



DIAGRAM. No. 8. चक्रबन्धः

DIAGRAM NO 9. सर्वतोभद्रम्

घ	न	म	न	न	म	न	घ
न	य	द्र	य	य	द्र	य	न
म	द्र	र	द्र	द्र	र	द्र	म
न	य	द्र	य	य	द्र	य	न
न	य	द्र	य	य	द्र	य	न
म	द्र	र	द्र	द्र	र	द्र	म
न	य	द्र	य	य	द्र	य	न
घ	न	म	न	न	म	न	घ

DIAGRAM NO 10. सर्वतोभद्रम्

त	प	न	प	प	न	प	त
प	र	व	र	र	व	र	प
न	व	न	व	व	न	व	न
प	र	व	र	र	व	र	प
प	र	व	र	र	व	र	प
न	व	न	व	व	न	व	न
प	र	व	र	र	व	र	प
त	प	न	प	प	न	प	त

APPENDIX III
BIBLIOGRAPHY

SELECT BIBLIOGRAPHY

Sri.P.B.Annangaracharya Swamy,

Guruparampara prabhava saram,

Granthamala office, Kancheepuram, 1975.

Karalapati Azhvarayya,

Yamakaratnakaram,

Sri Vaishnava Grantha Mudrapaka Sabha, Chennai.

Dr.Bangaru Sundarsana Azhvarulu,

Guruparampara Prabhavam,

(No address given) - 2000.

Dr.Brahmamitra Awasthi,

Alankara Kosa,

Indu Prakashan, Delhi – 7, 1989.

C.R.Devadhar,

Alankararatnakara,

Oriental Book Agency,

Poona, 1942.

Dr.R.C.Dwivedi,
The Poetical Light,
Motilal Banarasi Dass, Delhi, 1970.

Pandit Durga Prasada,
Sisupalavadha of Magha,
Panduranga Jawaji,
Nirnaya Sagar Press,
Mumbai, 1933.

Ganga Visnu Sri Krsna Das,
Kiratanjuniyam of Bharavi,
Laksmi Venkatesvara Press Publications,
Kalyan, Mumbai, 1867. (Reprint 1981).

Arcot P.Gopalakrishna Ramanuja Dasan,
Sri Kuratthazhvan Vaibhavam,
Vellore Computer & Offset Printers, Vellore.
(Year not given)

D.K.Gupta,
A Critical Study of Dandin & His Work,
Meharchand Lachhmandass, Delhi, 1970.

Prof. S.Hariharan,

Kavyalankara Sutra Vrtti,

The Madras Book Shop, Trichur, 1947.

Sri.Jivananda Vidya Sagar Bhattacharya,

The Kavyadarsha By Sri Dandi

Saraswati Press, Calcutta, 1882.

John Grimes,

A Concise Dictionary of Indian Philosophy,

University of Madras. 1988.

Kalanath Jha,

Figurative Poetry in Sanskrit Literature,

Motilal Banarasi Dass, Delhi, 1975.

K.Krishnamurthy,

i) Ananda Vardhana's Dhvanyaloka

Karnatak University, Dharvar, 1974.

ii) Vakroktijivitam of Kuntaka,

Karnataka University, Dharvar, 1977.

M.Krishnamacharya,

History of Classical Sanskrit Literature.

Motilal Banarasi Dass, Delhi, 1970.

Acarya Sri. Krsna Mohana Sastry,
Sahitya Darpanam of Visvanatha,
Chowkhamba Sanskrit Series Office,
Banaras, 1955.

Dr.S.Kulasekharan,
Ramanujarum Kambanum, (Tamil)
E 113, 16th Cross Street, Besant Nagar,]
Chennai – 90.

Kuvalayananda,
Tukaram Javaji,
Nirnaya Sagar Press,
Bombay, 1917.

Madanmohan jha,
Rasagangadhara,
Chaukambha Vidya Bhavan
Benaras – 1940.

Mayilai Madhavadasan,
Nalayira Divya Prabandham (Tamil)
Sadhu Acchukkudam
Rayapettai, Chennai, 1950.

M.Monier Williams,

Students Sanskrit English Dictionary,

Motilal Banarasi Dass.

P.V.Naganatha Sastry,

Bhamaha's Kavyalankara,

Motilal Benarasidass, Delhi,

Second Edition, 1970.

Sri Narayana Misra,

Astadhyayi Sutrapatha

Chowkamba Orientalia,

Varanasi, Delhi, 1977.

G.Parthasarathy Rao,

Alankara Ratnakarah of Sobhakara Mitra – A Study,

K.M.Rai Mittal, Mittal Publications,

New Delhi, 1992.

K.Rangachari,

The Sai Vaishnava Brahmins

Madras Govt.Museum, Madras, 1931

S.S. Raghavachar,
Sri Ramanuja on the Upanisads,
Prof. M. Rangacharya Memorial Trust,
Triplicane, Chennai, 1972.

Dr.V.Raghavan,

i) The Use & Abuse of Alankaras
ii) Bhoja's Sringara Prakasa
iii) Studies on Some Concepts of the Alankara Sastra,

The Adyar Library and Research Centre,
The Theosophical Society, Adyar, Chennai, 1942.

Sir. Raja Radha Kanta Deva,
Sabdakalpadruma, Vol-V
Chowkambha Sanskrit Series Office,
Banaras, 1961.

Sri.Natteri .V.Rajagopalan,
Sri Ranganatha Paduka Monthly,
Srirangam Srimad Andavan Ashramam,
Mylapore, Chennai, April 2006.

T.K.Ramachandra Aiyer,
A Short History of Sanskrit of Literature.
R.S.Vadyar & Sons,
Palghat, Kerala, 1998.

Dr.V.K.N.S.Raghavan,
The History of Visisthadvaita Literature,
Ajanta Publications, New Delhi, 1979.

V.K.Ramanujachari,
Sri Bhasyam
Srirangam Srimad Andavan Asramam
Chennai, 2002.

Ruyyaka,
Alankara Sarvasva with Jayaratha's Vimarsini,
Meharchand Lacchmandass, New Delhi, 1965.

C.Sankararama Sastri,
Chandraloka,
Sri Balamanorama Press,
Mylapore, Madras, 1936.

Dr. Satyavrath Singh
Vagbhatalankarah,
Chowkhamba Samskta Prakasanam,
Varanasi, 1957.

D.N.Shanbhag,
Yamakabharatam of Sri Madhvacarya,
Bharat Prakasam, Dharward, 1999.

Vidwan . M .Sripathi Sastri, B.A.,
Samskrta Dhatu Sagara Taranih,
The Little Flower Co.,
Madras, 1968.

Mm. Dadhica Pandita Sivadatta Sarma,
Naisadhiya Caritam of Sri Harsa,
Panduranga Javaji,
Nirnaya Sagar Press, Mumbai, 1926.

Chetlur Srivatasankacharyar,

i) Srirangam (Srimusnam) Srimad Anadavan
60th Birthday Celebration Souvenir
Srirangam Srimad Andavan Asramam,
Chennai, 1995.

ii) Panca Stavam,
Sri Visishtadvaita Pracharini Sabha,
Chennai, 1988.

Suresh Mohan Bhattacharya,
The Alankar Section of the Agnipurana,
Firma KLM Pvt. Ltd.,
Calcutta, 1976.

Sushil Kumar De,
The Vakrokti Jivita,
Firma KLM Pvt. Ltd.,
Calcutta, 1923.

Vasudev Laxman Sastri Pansikar,
Vinayaka Narayana Sastri Joshi,
Bhattikavya,
Panduranga Javaji's Nirnaya Sagar Press,
Bombay, 1934.

Uttamur Viraraghavacharyar,
Brahmasutra Sribhashya
Sri Visishtadvaita Pracarini Sabha,
Chennai, 1989.

Sri Taranatha Tarka Vacaspatih,
Vacaspatyam,
Chowkambha Samskirt Series Office,
Benaras, India, 1969.

SL NO: 52
MCL 47